# विशुद्धवेदान्तपरिभाषा

## VIS'UDDHA-VEDĀNTA-PARIBHĀSHĀ

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

# विक्रेयाः कतिचन वेदान्तग्रन्थाः

—:ॐ:—

**गीताशास्त्रार्थविवेकः** – श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मितः स्वतन्त्रो ग्रन्थः । अत्र प्रकरणे प्रप्रथमं साङ्ख्य–योग–कर्म–ध्यानादिपदार्थानां विवेकः कृतः । तदनु कर्मयोगध्यानयोगादीनां संबन्धो निरूपितः । साङ्ख्ययोगदर्शनाभ्यां वैलक्षण्यं च गीताशास्त्रस्य स्फुटीकृतम् । शाङ्करभाष्यानुसारेण शास्त्रार्थ-विवेचनं नूत्नतया सरण्या कृतमत्र ॥

**वेदान्तडिण्डिमः** – भावबोधिनीव्याख्यासहितः । प्रतिश्लोकं वेदान्तवाक्योदा-हरणेन वेदान्तप्रमेयाणि सुललितशैल्या विशदीकृतान्यत्र ॥

**वेदान्तविद्वद्गोष्ठी** – अत्र श्रीशङ्करभगवत्पादानुगृहीतप्रस्थानसतत्त्वमधिकृत्य विदुषा-मभिप्रायभेदाः संगृहीताः । श्रीचरणैरनुगृहीताभ्याम् आंग्लगीर्वाणमयीभ्यां पूर्वपीठिकाभ्यां समलङ्कृतश्च ग्रन्थः ॥

**विशुद्धवेदान्तसारः** – अनुभवसारदृष्टिः, मनःप्रधानदृष्टिः, इन्द्रियप्रधानदृष्टिः – इति ज्ञानसाधनविशेषविभागानुसारेण विभक्तम् उपदेशत्रयं गुरुशिष्यसंवाद-रूपेण संगृहीतमत्र प्रकरणे । अशाङ्करप्रस्थानप्रक्रियासंमिश्रणरहितं श्रीशङ्कर-भगवत्पादसम्मतवेदान्तार्थसारं जिघृक्षूणामत्यन्तोपकारकम् ॥

**वेदान्तबालबोधिनी** – प्रातःस्मरणस्तोत्रस्य भगवत्पादीयविरचितस्य प्रश्नोत्तररूपं व्याख्यानम् । अस्मिन् प्रकरणे ब्रह्मविद्याया अनुभवावसानत्वं पदे पदे स्मारयन्तीनां भाष्यकारोक्तीनां सरणिमेवानुसृत्य शास्त्रार्थः सुविशदीकृतः ॥

विस्तृतग्रन्थसूचीप्राप्तये अधिकविषयाधिगमार्थं
चाभ्यर्थनीयाः अध्यक्षाः


## अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

( हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे )

अध्यात्मग्रन्थावलिः

# विशुद्धवेदान्तपरिभाषा

श्रीशङ्करभगवत्पादसंप्रदायानुमतवेदान्तपरिभाषाविष्करणपरं प्रकरणम्

रचयितारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १४२

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

क्रि. १९६९

First Edition 1969
1000 Copies

©

All Rights Reserved by
The Adhyatma Prakasha Karyalaya
Holenarsipur

Registered under the Copy Right Act, 1957

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press
Holenarsipur

## PUBLISHERS' NOTE

Students of S'āṅkara-Vedanta will be really grateful to Sri Swami Satchidanandendra Saraswati Maharaj who has unravelled the techniques of S'āṅkara-Vedanta in its pristine purity as distinguished from all systems past or present. This work like its predecessor, the *Vis'uddha-Vedanta-Sāra* by the same author, appeals directly to the *Vedāntas* or the Upanishadic texts as interpreted by S'aṅkara, whose dictum is that *Anubhava* or universal intuition as well as the Sacred texts must be relied upon in the enquiry into the nature of Brahman.

The work is intended for the use of critical students of Vedanta as well as beginners. We ardently hope that it will be received by the public in the same spirit as the author's previous productions.

Holenarsipur
1-3-1969

Y. NARASAPPA,
*Chairman, A. P. Karyalaya.*

# INTRODUCTION

## Title of the work

This work is entitled " *Visuddha-Vedanta-Paribhāsha* " (Techniques of Pure Vedanta), mainly because it is the only attempt which specifically aims at presenting the technical terms and methods employed in explaining the central doctrine of Vedanta as sanctioned by S'aṅkara's tradition in contradistinction to those in vogue in similar systems ancient or modern.

## Hurdles in the path of Research Scholars and Pandits

Pure Vedanta has resisted all attempts of Scholars to define its limits or to label it as one or the other of the systems familiar to students of Western thought. It has been alternately dubbed scholasticism, theology, mysticism or metaphysics. And it has tempted some of the eastern thinkers and Pandits to subsume it under *Mīmāṁsā*, *Sāṅkhya*, *Yoga* or *Nyāya* or even Buddhistic philosophy or else to treat it as a conglomeration of all these systems. The reason is very simple. Writers on pure Vedanta accept or adopt the terminology as well as certain doctrines of these schools while

discussing on the empirical level, but strictly adhere to their main theme and method when they wish to teach the transcendental truth. Failure to keep this distinction intact, and to understand the techniques of pure Vedanta, has baffled many a research-scholar engaged in a serious attempt to understand S'aṅkara's Vedanta.

## Subject Matter of the Work

Accordingly, in this work, I have confined myself to the classical works of S'aṅkara, and to the Sūtra-Bhāshya in particular, in appealing to authorities for my views about the subject-matter, methods and terminology which can be safely assumed to belong to the pure system. The first and foremost unique doctrine of S'āṅkara-Vedanta is that taught by the S'vetas'vatara Upanishad (Sve. 6-11). There is only one Witnessing Pure Consciousness in all beings, (एको देवो सर्वभूतेषु गूढः .... साक्षी चेता केवलो निर्गुणश्च) and according to the Chāndōgya (6-8-7....) it is the one Reality and Self of the whole universe and of each and every one of the souls (ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि). And the second is that all the apparent world is but a play of words while essentially it is the substrate Brahman (वाचारम्भणं विकारो नामधेयम् ६-४-१....). Basing himself on texts like these, S'aṅkara puts forward his definition of Avidya (ignorance) as the mutual superimposition

of the Real Ātman and the unreal, the Body, mind and the senses. He considers bodilessness (अशरीरत्व) alone as the pure nature of the Self, and declares that pleasure and pain can never touch the eternally bodiless Self (अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः – छां. ८-१२-१). It is the one purport of all the Upanishads to lead the earnest enquirer to the truth of the absolute identity of the apparently embodied Jīva or individual soul with the bodiless Universal Self.

Now, the Universal Self or Brahman is really devoid of all specific features and as such can never be objectified by words or thoughts, for these obtain only in empirical life and are pre-eminently intended to express or conceive empirical facts. Naturally therefore they can never reveal Reality which is their very Self. Vedanta therefore uses conventional words and concepts for inducing the enquirer to see that characteristics which the empirical mind naturally superimposes on Reality, never actually pertain to it, and that they are essentially one with the Absolute Self, or Reality. That words cannot express, or that thoughts cannot throw light on Brahman is, however, no disadvantage either to the teacher or to the seeker of truth in Vedanta, for the basic teaching of the Upanishads is to point out that the Reality or Brahman is the real

immediate evershining Self of all, and that it is through the light of its consciousness that everything else, inclusive of words and thoughts themselves become known. It is for this reason that the method of अध्यारोपापवादन्याय, the method of deliberate ascription and its subsequent removal, is an unique tool in the hands of teachers of Vedanta. The maxim of the tradition is अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते 'Reality which is absolutely devoid of all distinctions and differences is explained through deliberate imputation and negation.' It is this hall-mark that distinguishes Pure Vedanta from all other types of Absolutisms.

The nature of Avidya, the antecedent reason and the effect of this Avidya or ignorance on human life, have to be accurately and precisely known if one wishes to avoid confounding it with what the term denotes and connotes in other systems of Indian Philosophy. Mutual superimposition of the Real Self and the unreal not-self is *avidyā*, which is due to the non-discrimination of the real nature of these two; and its effect is *vyavahāra*, to think, speak, and act as though one were really the knower, actor and experiencer of the fruits of actions. It is this *vyavahāra* which is mundane life or bondage from which Vidya (right knowledge of the real nature of the Self and the not-self) releases the soul finally. How this final release ensues so soon as

enlightenment dawns, how enlightenment results immediately from the knowledge of the text 'That thou art', how the exact significance of the terms 'that' and 'Thou' are to be ascertained and what are all the acts of discipline necessary to qualify the seeker to attain enlightenment form the subject-matter of the present work.

I hope that a fairly complete account of the important techniques of Pure Vedanta is comprised in this little book. For a fuller account of the Unique Method of Vedanta the *Adhyāropāpavāda-Nyāya*, the reader is reffered to my work the "*Vedanta-Prakriya-Pratyabhijña*" and greater details in technical terms and methods will perhaps appear in my commentary on the *Samanvaya-Sūtra*, if it is destined to go to the press.

**Acknowledgements**

My Narayana Smaranams to all those that have assisted in making this endeavour a success, and to the Adhyatma Prakasha Karyalaya for having accepted the Copy Right of the work and published it so soon. I pray for the benign grace of Bhagavan Narayana through which alone the contents of this work may prove useful according to its merit to those for whom it is intended.

Holenarsipur
14-2-1969

SWAMI SATCHIDANANDENDRA SARASWATI

# प्रास्ताविकी विज्ञप्तिः

—:~:—

## प्रकरणाभिधानम्

विदितमेवैतद् वाचकमहोदयानां यत् सर्वमपि शास्त्रं स्वस्वोचितपारिभाषिकपदवाक्यन्यायादिसङ्केतविशेषाननुरुध्यैव स्वस्वाभिधेयं वस्तु प्रतिपादयितुं प्रवर्तत इति । परिभाषा नाम पठितैकदेशस्थः सन् स्वबुद्धिजननद्वारा सर्वशास्त्रार्थज्ञानोपकारकः पदादिसङ्केतः । वेदान्तशास्त्रेऽपीतरशास्त्रेष्विव पारिभाषिकपदादीनि तत्र तत्र चकासति यैर्विज्ञातैरेव शास्त्रार्थबोधो निर्विचिकित्सं जायेत नान्यथेति जिज्ञासुभिरवश्यं तद्विज्ञानं संपादयितव्यम् । यद्यपि सन्त्येव वेदान्तार्थावलम्बिपरिभाषाप्रकाशनार्थं प्रवृत्तानि प्रकरणानि विनिर्मितानि विद्वद्भिः, तथापि न तानि विशुद्धशाङ्करप्रस्थानानुसारेण वेदान्तार्थमपेक्षितं प्राधान्येन प्रतिपादयन्ति, किं नाम, व्याख्यानप्रस्थानभेददृष्ट्या, न्यायशास्त्राहृतपरिभाषामुपगम्य लक्ष्यलक्षणप्रमाणप्रमेयाद्यनपेक्षितनिरूपणेऽपि प्रवृत्तानि, अवैदान्तिकतर्ककर्कशशब्दजालमहारण्ये जिज्ञासून् प्रवेश्य वृथायासजननेन व्यथयन्ति । तदेतदालोक्य वेदान्तार्थनिरूपणे एव बद्धादरान् सांप्रदायिकानेव प्रस्थानत्रयभाष्यादिग्रन्थान् प्रमाणीकृत्य वेदान्तपरिभाषा निरूपिता अस्मिन् प्रकरणे इत्यन्वर्थनाम्नीयं विशुद्धवेदान्तपरिभाषा ॥

## प्रतिपाद्यविषयाः

अत्र च वेदान्तवाक्यार्थाध्यवसानेनैव कथं ब्रह्मात्मावगतिर्निर्वर्त्यते इत्येतत् स्फुटीकृतम् । 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छां.) इति श्रुत्युपदिष्टमर्थं जिज्ञासुजनचित्ते संक्रामयितुम् (१) ब्रह्म, जगत्, जीवश्च – इति पदार्थत्रयस्य सतत्त्वम्, (२) जगद्ब्रह्मणोः, जीवब्रह्मणोश्च संबन्धश्च सांप्रदायिकपरिभाषाजातमवलम्ब्य निरूपितः ॥

यद्यपि प्रत्यस्तमितसर्वविशेषत्वात्, नित्यनिर्भेदत्वाच्च, अवाङ्मनसगोचरमेव परमार्थतत्त्वम्, तथाप्यविद्यावस्थायां तत्र कल्पितवेद्यवेदितृवेदनलक्षणभेदमध्यारोपदृष्ट्या अङ्गीकृत्यैव ब्रह्मजिज्ञासा प्रवर्तिता ज्ञानकाण्डेन, तद्दृष्ट्यैव च ब्रह्मात्मैकत्वावगतिप्रयोजनानां वेदान्तानां प्रामाण्यम्, अधिकारिणो जिज्ञासुत्वं विचारस्य चानुभवावसानत्वम्; न तु पूर्वमीमांसायामिव वेदवाक्यानामपौरुषेयवाक्यत्वमात्रेण श्रुतेरिह प्रामाण्यम्। एवं श्रुत्यनुगृहीततदनुगुणान्यतरतर्कस्याप्यध्यारोपदृष्ट्यैवानुभवाङ्गत्वेनाश्रयणमत्र, न तु न्यायादिशास्त्रेष्विव प्रमाणतच्छोधकानुमानादिलक्षणयोर्ब्रह्मात्मावगतिनिर्वर्तकत्वमभ्युपेयते। ब्रह्मणश्च जिज्ञास्वात्मत्वात्, स्वयंसिद्धानुभवस्वरूपत्वाच्च नैव प्रमाणतर्काद्यपेक्षया सिद्ध्याकाङ्क्षेति कल्पितावद्धर्मनिवर्तकत्वेनैव वेदान्तानां प्रामाण्यमुपचर्यते। 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति साम्प्रदायिकपरिभाषानुसारेणान्वयव्यतिरेकलक्षणयुक्तिश्च तर्कत्वेनोपचर्यते – इति संप्रदायरहस्यमुद्घाटितमत्र ॥

अविद्यास्वरूपनिमित्तकार्याणां वर्णनमप्यत्र यथोक्ताध्यारोपापवादप्रक्रियामनुसृत्यैव। आत्मानात्मनोः सत्यानृतयोस्तत्त्वाविवेकनिमित्तया, इतरेतराध्यासलक्षणया, अविद्यया प्रमाणप्रमेयकर्तृत्वभोक्तृत्वादिव्यवहाराः सर्वे प्रवर्तिताः – इत्येषा प्रक्रिया विस्तरेण वितानितात्र प्रकरणे, प्राधान्येन सूत्रभाष्यप्रतिपादनशैलीमेवाश्रित्य। परमपुरुषार्थहेतुभूतवाक्यार्थज्ञानापेक्षितपदार्थविवेकप्रकारो विवृतः संक्षेपतः। ज्ञानस्य बहिरङ्गान्तरङ्गसाधनानां सतत्त्वं च संग्रहेण निरूपितम्। अन्ते च प्रकरणार्थः पुनरपि पुञ्जीकृत्य संग्रहेणोक्तः श्रोतॄणां सुखावधारणो यथा स्यादिति ॥

## कृतज्ञताविष्करणम्

तदिदं प्रकरणं तत्र तत्र सकृदालोकनपूर्वकं विचारसरण्याः संस्कारार्थं सूचनाः प्रत्तवते पण्डितप्रवराय ब्र·श्री· हेच्· अनन्तमूर्तिशास्त्रिशर्मणे, लिखितग्रन्थमामूलचूडं सकृदवलोकनेन शब्दसौष्ठवार्थं स्वाभिप्रायदानेनोपकृतवते वेदान्तशिरोमणीत्यादिबिरुदाङ्किताय ब्र· श्री· परकजे सुब्रह्मण्यभट्टाय च मम

नारायणस्मरणपूर्वकहार्दिकाभिनन्दनं समुल्लसतु । मुद्रणावसरे सीसकाक्षर-योजनाजनितदोषप्रमार्जनं यथापूर्वं कृत्वा उपकृतवते अध्यात्मविद्याप्रवीणाय ब्र· श्री· लक्ष्मीनरसिंहमूर्तिशर्मणेऽपि मम हार्दिकनारायणस्मरणानि ॥

अत्रावशिष्टान् भाषादोषान् विचारसरणिदोषांश्च प्रमार्ज्य प्रकरणं यथा आगामिसंस्करणे सर्वथापि विशुद्धं यथा स्यात् तथा कर्तुं प्रार्थ्यन्ते विद्वत्प्रकाण्डाः । अन्ते ग्रन्थमिमं लेखितुं परिसमापयितुं च सामर्थ्यमनुगृहीत-वन्तं सर्वस्यात्मभूतं भगवन्नारायणं सप्रश्रयं नतोऽस्मि ॥

होळेनरसीपुरम्
श्रीकीलकसंवत्सरे माघकृष्ण
त्रयोदश्यां भार्गववासरे

इति श्रीशङ्करचरणस्मरणबद्धजीवनः
**श्रीसच्चिदानन्देन्द्रसरस्वतीभिक्षुः**

# विषयानुक्रमणिका


| खण्डः | विषयः | अंशाः | पत्रपार्श्वसङ्ख्या |
|---|---|---|---|
| १. | ब्रह्म | १–३ | १–३ |
| २. | अविद्या | ४–५ | ३–५ |
| ३. | जीवेश्वरविभागव्यवहारः | ६–७ | ६–९ |
| ४. | ब्रह्मणो जगत्कारणत्वव्यवहारः | ८–१८ | ९–२४ |
| ५. | सृष्टिप्रलयव्यवहारः | १९–२३ | २४–२८ |
| ६. | जीवस्य जन्मादिव्यवहारः | २४ | २९–३० |
| ७. | प्रमाणप्रमेयव्यवहारः, तर्कश्च | २५–३१ | ३०–३७ |
| ८. | ब्रह्मात्मनः शब्दप्रमाणकत्वम् | ३२–३४ | ३७–४१ |
| ९. | कर्तृत्वभोक्तृत्वव्यवहारः | ३५–३९ | ४१–४५ |
| १०. | उपास्योपासकविभागव्यवहारः<br>जीवस्य गत्यागती ४६–४९ | ४०–५१ | ४५–५९ |
| ११. | ब्रह्मात्मभावः | ५२–५३ | ५९–६४ |
| १२. | ब्रह्मात्मानुभवसाधनम्, एकदेशिमतेन | ५४–५८ | ६४–७२ |
| १३. | ब्रह्मात्मानुभवसाधनम्, सिद्धान्तरीत्या | ५९–६१ | ७२–७५ |
| १४. | श्रवणादिसतत्त्वविचारः, सिद्धान्तरीत्या | ६२–६५ | ७५–८१ |
| १५. | तत्पदार्थविवेकः | ६६–७४ | ८२–९९ |
| १६. | त्वंपदार्थविवेकः | ७५–८६ | ९९–११४ |
| १७. | वाक्यार्थज्ञानम् | ८७–९१ | ११४–१२० |
| १८. | उपसंहारः | ९२–१०० | १२१–१२८ |
| | शब्दानुक्रमणिका | | १२९–१३१ |

# सङ्केताक्षरविवरणम्

| सङ्केतः | विवरणम् |
|---|---|
| अध्या. भा. | अध्यासभाष्ये |
| उप. | उपदेशसाहस्र्याम् |
| ऐ. | ऐतरेयोपनिषदि |
| का. | काठकोपनिषदि |
| के. | केनोपनिषदि |
| खं. | खण्डे (एतदुत्तरसंख्या अंशसूचिनी) |
| गी. | भगवद्गीतासु |
| गी. भा. | गीताभाष्ये |
| गौ. का. | गौडपादीयकारिकासु |
| गौ.का.भा., गौ.भा. | गौडपादीयकारिकाभाष्ये |
| छां. | छान्दोग्योपनिषदि |
| छां. भा. | छान्दोग्यभाष्ये |
| तै. | तैत्तिरीयोपनिषदि |
| तै. भा. | तैत्तिरीयभाष्ये |
| पा. | पत्रपार्श्वसंख्या |
| प्र. | प्रश्नोपनिषदि |
| बृ. | बृहदारण्यकोपनिषदि |
| बृ. मा. | बृहदारण्यके-माध्यन्दिनपाठानुसारेण |
| बृ. वा. | बृहदारण्यकभाष्यवार्तिके |
| मां. | माण्डूक्योपनिषदि |
| मां. भा. | माण्डूक्यभाष्ये |
| मुं. | मुण्डकोपनिषदि |

| सङ्केतः | **विवरणम्** |
| --- | --- |
| श्वे. | श्वेताश्वतरोपनिषदि |
| सू. | वेदान्तसूत्रम् |
| सू. भा. | सूत्रभाष्ये |

**विशेषसूचना :**—एवमवशिष्टा अपि सङ्केतार्था ऊह्याः । आद्याक्षरेण तत्तदुपनिषत्, तदुत्तरं भा. इत्यक्षरेण तत्तद्भाष्यं च ज्ञेयम् ॥

# अशुद्धशोधनम्, संयोजनं च

| पत्रपार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| २ | ९ | अप्राणमसुखम् | अप्राणममुखम् |
| ११ | अ. ४ | त्मावगमात् | त्मत्वावगमात |
| १८ | अ. ८ | किं निमित्तेयं | किंनिमित्तेयं |
| २० | अ. २ | व्याचिकीर्षत | व्याचिकीर्षित |
| २१ | ८ | जाता | जात |
| २२ | अ. ३ | फलानवगमात् | फलावगमात् |
| २४ | अ. १० | वाक्यता प्रदर्शने तेषाम् | तत्रैकवाक्यताप्रदर्शने तासामादरः |
| २५ | ५ | तेज आदिका | तेजआदिका |
| २६ | ६ | विशिष्यते | विशेष्यते |
| २६ | १० | मीमांस्य | मीमांसित्वा |
| ३१ | ४ | स्वत्मन्यध्यस्त | स्वात्मन्यध्यस्त |
| ३२ | १ | तत्त्वावदिधारयिषुणा | तत्त्वमवदिधारयिषुणा |
| ,, | १२ | अरुणि | अरणि |
| ,, | १३ | भस्मा | भस्म |
| ३७ | अ. ४ | भूतमात्मतत्त्वम् | भूतं ब्रह्म |
| ३९ | अ. १०, ९ | विज्ञापयत्, ...विवेचयच्च | विज्ञापयन्, ...विवेचयंश्च |
| ४४ | ११ | ब्रह्मावगतेः | तथापि ब्रह्मावगतेः |
| ४६ | अ. ८ | समन्वयात् (एतदूर्ध्वं संयोज्यम्) 'सर्वेषु हि वेदान्तेषु वाक्यानि एतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि') | |

| पत्रपार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| ,, | अ. ४ | शून्यत्वात् | रहितत्वात् |
| ४७ | ११ | संसाराख्यम् | संसाररूपम् |
| ,, | अ. १० | रूपे | रूपे हि |
| ४८ | अ. ८ | वस्तुभूत | भूत |
| ५० | ५ | प्रप्त्युप | प्राप्त्युप |
| ७० | ४ | नुभावं | नुभवं |
| ७२ | ६ | प्रतीयते | प्रतायते |
| ७४ | ३ | सञ्चितानामपि | सञ्चितानपि |
| ८४ | ५ | बुद्धयत्पादनाय | बुद्धयुत्पादनाय |
| ८८ | ३ | बलायांसि | बलीयांसि |

॥ ॐ ॥

# विशुद्धवेदान्तपरिभाषा

—:ॐ:—

अवाच्यमप्रमेयं च कार्यकारणवर्जितम् ।
निष्क्रियं निष्कलं शान्तमात्मानमनुसंदधे ॥ १ ॥
पदवाक्यप्रमाणज्ञान् संप्रदायविदो गुरून् ।
नत्वा विशुद्धवेदान्तपरिभाषा प्रकाश्यते ॥ २ ॥

## १. ब्रह्म

प्रत्यस्तमितसर्वविशेषं वाङ्मनसातीतं परमार्थतत्त्वं परप्रतिषेधैकगम्यं दर्शयन्ति वेदान्ताः 'अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत् परमस्ति' (बृ. २-३-६), 'अन्यदेव तद् विदितादथोऽविदितादधि' (के. १-४), 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' (तै. २-९)-इत्येवमाद्याः । स्मृतयश्च 'न सत्तन्नासदुच्यते' (गी. १३-१२)-इत्याद्याः ॥ १ ॥

प्रपञ्चोपशमस्वरूपत्वादेवेदं तत्त्वं जातिद्रव्यगुणक्रियासंबन्धलक्षणनिमित्तान्याश्रित्य प्रवर्तमानानां शब्दानां विषयो न भवति, गौः, मृत्, शुक्लः, पाचकः, धनी – इति यथा लोकसिद्धाः पदार्थाः ।

अत एव मनसा प्रत्येतुमपि न शक्यते तत् । सहैव हि प्रवृत्तिः शब्दप्रत्यययोः सर्वत्र स्वविषये दृष्टा लोके । यदापि ब्रह्म निर्दिश्यते 'सत्यम्', 'ज्ञानम्', 'विज्ञानमानन्दम्', 'सत्', 'ब्रह्म', 'आत्मा'– इत्यादिभिर्विधिमुखैः शब्दैः, तदापि अध्यारोपितोपाधिविशेषैरेव तथा तथा निर्दिश्यते, न तु साक्षात् । यथोक्तहेतोः । यदा पुनः स्वरूपमेव निर्दिदिक्षितम्, तदा अयमेवाभ्युपायो यदुत प्राप्तप्रतिषेधद्वारेणैव निर्देशः –'नेति नेति' (बृ. २-३-६), 'अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणमसुखममात्रमनन्तरमबाह्यम्' (बृ. ३-८-८), 'अपूर्वमनपरमनन्तरमबाह्यम्' (बृ. २-५-१९)–इत्यादिश्रुतिषु यथा ॥ २ ॥

तदेवं प्रत्यस्तमितसर्वविशेषम् अवाङ्मनसगोचरमपि सदिदं परमार्थतत्त्वं स्वयंसिद्धम् अप्रत्याख्येयस्वभावम्, सर्वस्याप्यात्मत्वादेव । 'स एष नेतिनेत्यात्मा' (बृ. ३-९-२६, ४-२-४, ४-४-२२, ४-५-१५), 'तत्सत्यं स आत्मा' (छां. ६-८-७, ६-९-४, ६-१०-३, ६-११-३, ६-१२-३, ६-१३-३, ६-१४-३, ६-१५-३, ६-१६-३), 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ. २-५-१९), 'स आत्मा स विज्ञेयः' (मां. ७) – इत्यादिश्रुतिभ्यः । वेदान्तास्तु अध्यारोपितातद्धर्मनिवर्तकत्वेन तत्र प्रमाणमित्युपचर्यन्ते । वस्तुतस्तु अविषयत्वात् अप्रमेयमेव तत् 'एतदप्रमयं ध्रुवम्' (बृ. ४-४-२०) इति श्रुतेः ; 'अनाशिनोऽप्रमेयस्य' (गी. २-१८) इति स्मृतेश्च । तदुक्तं भगवता भाष्यकारेण –

"न हि शास्त्रम् इदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृ-वेदनादिभेदम् अपनयति" सू. भा. १-१-४, पा. १६.

इति ॥ ३ ॥

## २. अविद्या

यद्यपि स्वरूपेण वेद्यवेदितृवेदनादिभेदवर्जितमेव ब्रह्म नित्यशः, तथापि तस्मिन् अस्मत्प्रत्ययगोचरत्वलक्षणं वेदितृत्वं तदितरत्वेन विभाविते च इदंप्रत्ययगोचरत्वलक्षणं वेद्यत्वं च प्रकल्प्य व्यवहरति 'अहमिदं वेद्मि' इति; तथा आत्मनि कर्तृत्वं भोक्तृत्वं च प्रकल्प्य व्यवहरति लोकः 'अहमिदं करोमि; तेन सुखं दुःखं वा अनुभवामि' इति। तत्र इदंप्रत्ययगम्यम् अनात्मरूपं वेद्यम् – अहंप्रत्ययगम्यस्य वेदितुः, युष्मत्प्रत्ययगोचरोऽपि भवति; बुद्ध्यादीनामेकैकमप्यनात्मानं संबोधनेन विषयीकृत्य 'त्वम्' इत्यपि व्यपदेष्टुं शक्यते यतः। तत्र अहङ्कारम् अनृतरूपमेव सत्यस्वरूपे आत्मन्यध्यस्य, तं च सत्यमात्मानम् अनृतेऽहङ्कारे अध्यस्यति लोकः, सत्यानृतसतत्त्वविवेकाभावात्। तयोश्च सत्यानृतयोः, आत्मनः प्रत्यक्त्वं बोद्धृत्वं चाहङ्कारे, अहङ्कारस्य विक्रियावत्त्वं बोध्यत्वं चाऽऽत्मनि सर्वविक्रियासाक्षिणि अध्यस्य 'अहं वेदिता, कर्ता, भोक्ता च' इति मृषैवाभिमन्यते। तदेवम् अस्मत्प्रत्ययगोचरे व्यावहारिके विषयिणि युष्मत्प्रत्ययगोचराणामपि देहेन्द्रियमनोबुद्धीनां विषयभूतानाम्, तद्विपर्ययेण तेषु नित्यविषयिण आत्मनश्च तादात्म्यं ताद्धर्म्यं चाध्यस्य 'अहं स्थूलः, कृशः; गौरः, कृष्णः; मूकः, वाग्मी; तिष्ठामि, गच्छामि;

अन्धः, चक्षुष्मान्' इति, 'सङ्कल्पयामि, इच्छामि, द्वेष्मि, संशये, अध्यवस्यामि' इति चैवं व्यवहरति, इतरेतरतत्त्वाविवेकेनैव ॥

तमेतम् आत्मानात्मनोरितरेतरतादात्म्यताद्धर्म्याध्यासम् **'अविद्या'** इति मन्यन्ते तत्त्वदर्शिनः ; तद्विवेकेन च वस्तुस्वरूपावधारणं **विद्याम्** आहुः ॥ ४ ॥

तदेवम् आत्मानात्मनोरन्योन्यात्मकताऽऽकलनलक्षणं अन्योन्यधर्मवत्ताऽऽकलनलक्षणं च मिथ्याज्ञानम् अविद्यायाः **स्वरूपम्** ; तस्य **निमित्तं** चाऽऽत्मानात्मनोरितरेतरविवेकाभावः ; **कार्यं** तु अनृतरूपस्यानात्मनः प्रत्युपस्थापनम्, ततश्च प्रमाणप्रमेयव्यवहारः, कर्तृत्वभोक्तृत्वव्यवहारश्च – इति स्थितम् ॥

स चायं व्यवहारः, लौकिको वैदिको वा वस्तुतत्त्वविवेकाभावनिबन्धनमिथ्याबुद्धिमात्रहेतुत्वात्, उत्पन्नात्मानात्मसतत्त्वविवेकज्ञानस्य मिथ्याबुद्धिलक्षणाविद्यानिवृत्तौ निवर्तते ; अविद्यायाश्च विद्याविरोधित्वात् वस्तुतत्त्वविवेकलक्षणविद्योत्पत्तिमात्रान्निवृत्तिः ॥

एवं च सति, अविद्यया मिथ्याविकल्परूपया यत्र यद्रूपत्वाध्यासः, यद्धर्मवत्त्वाध्यासो वा, तत्कृतेन गुणेन वा दोषेण वा – अणुमात्रेणापि–विकल्पास्पदभूतं तद् वस्तु न परमार्थतः संबध्यते । तथा च आत्मचैतन्याध्यासकृतेन प्रत्यक्त्वज्ञातृत्वलक्षणेन गुणेन अहङ्कारो न कदापि किञ्चिदपि संबध्यते ; तथा अहङ्कर्तृभोक्तृत्वाध्यासकृतेन विक्रियावत्त्वसुखदुःखभोगादिरूपेण दोषेण वा नाऽऽत्मा तत्साक्षी

ईषदपि संबध्यते । एवम् अस्मत्प्रत्ययगोचर आत्मा स्वस्मिन्नध्यारोपितदेहेन्द्रियमनोबुद्धिभिर्विषयभूतैरनात्मभिस्तद्धर्मैर्वा नाणुमात्रमपि संबध्यते क्वचिदपि परमार्थतः । एवं देहेन्द्रियादयोऽपि स्वस्मिन्नध्यारोपितचैतन्यरूपेण, आत्मस्वरूपेण वा धर्मेण न परमार्थत एव चित्स्वरूपा आत्मस्वरूपा वा स्युः । अपि च सूक्ष्मेक्षिकया वीक्ष्यमाणे ज्ञातृत्वं कर्तृत्वं भोक्तृत्वं च नैवात्मनः, नाप्यनात्मनः संभवति । अविक्रियत्वादात्मनः, अचेतनत्वात्, अविद्याप्रत्युपस्थापितानृतस्वभावत्वाच्चानात्मनः । यथोक्तं भाष्यकारेण –

"तथा च श्रुतिः 'यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्' इत्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयति । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना च विवेकिनः कर्तृत्वादिव्यवहाराभावं दर्शयति ॥"
सू. भा. १-२-१२, पा. ७४.

इति ॥

सेयम् अविद्यापि अविद्यादृष्ट्यैव लौकिकैः स्वात्मन्यध्यस्तेति न तया स्थितया वस्तुत एवाविद्यावत्त्वं तेषाम्, न च तया विद्यया निवर्तितया वस्तुत एव निवृत्ताविद्यत्वं तेषाम् । अत एवोक्तं भाष्यकारैः –

"एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ॥" अध्या. भा.

इति । युक्तं चैतत् । न ह्यध्यस्तस्य वस्तुत एवोत्पत्तिर्नाशो वा उपपद्यते । तैमिरिकदृष्टस्य द्वितीयचन्द्रस्य नाऽऽत्मलाभो नाशो वा अस्ति यद्वत् । तस्मात् साधूक्तमिदं यद् वेदान्तशास्त्रम् अविद्याकल्पितवेद्यवेदितृवेदनादिभेदमपनयदेव ब्रह्मणि प्रमाणमित्युपचर्यत इति ॥ ५ ॥

## ३. जीवेश्वरविभागव्यवहारः

एवं तावन्नित्यनिरस्तसर्वविशेषेऽपि ब्रह्मणि नैसर्गिकाविद्यावशात्, 'अहङ्कर्ता', 'अहंप्रत्ययविषयः', 'प्रत्ययी' – इति च विकल्पितः, देहेन्द्रियमनोबुद्ध्यध्याससंबन्धवान् प्रमाता, कर्ता, भोक्ता च संसारानर्थभागेकः, तत्साक्षी च सर्वभूतस्थः, समः, एकः, कूटस्थनित्यः, पुरुषः सर्वसंसारधर्मासंस्पृष्ट अपरः – इत्येवं मिथ्याकल्पितो विभागोऽत्रभासत इति प्रदर्शितम् । तदेतत् श्रुत्याप्यनूद्यते । तद्यथा–'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।' (का. १–३–४), 'तयोरन्यः पिप्पलं स्वाद्वत्ति' (मुं. ३–१–१) इति च संसार्यात्मानुवादः ; 'अनश्नन्नन्योऽभिचाकशीति (मुं. ३–१–१), 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वे. ६–११) इति चासंसारिभूतकूटस्थपुरुषानुवादः ॥

तत्र निष्प्रपञ्चम् अद्वितीयं च सदेव ब्रह्म अविद्याकल्पितनामरूपबीजव्याकरणापेक्षया साक्षी, सर्वज्ञः, सर्वशक्तिः, ईश्वरः, स्रष्टा – इति च व्यवह्रियते । तदुक्तं भाष्ये –

(१) "सर्वज्ञस्येश्वरस्याऽऽत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्याम् अनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य 'माया', 'शक्तिः', 'प्रकृतिः'–इति च श्रुतिस्मृत्योरभिलप्येते । ताभ्याम् अन्यः सर्वज्ञः ईश्वरः, 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' (छां. ८–१४–१) इति श्रुतेः । 'नामरूपे व्याकरवाणि'

(छां. ६-३-२), 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभि-वदन् यदास्ते' (तै.आ. ३-१२-७), 'एकं बीजं बहुधा यः करोति' (श्वे. ६-१२) इत्यादिश्रुतिभ्यश्च। एवम् अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति, व्योमेव घटकरकाद्युपाध्यनुरोधि। स च स्वात्म-भूतानेव घटाकाशस्थानीयान् अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरण-सङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रति ईष्टे व्यवहारविषये। तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्य ईश्वरत्वम्, सर्वज्ञत्वम्, सर्वशक्तित्वं च, न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। तथा चोक्तम् – 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छां. ७-२४-१) इति, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना च॥

"एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ताः सर्वे। तथा ईश्वरगीतास्वपि –

'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥

नाऽऽदत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥' (गी. ५-१४, १५)

इति परमार्थावस्थायाम् ईशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते। व्यवहारावस्थायां तूक्तः श्रुतावपीश्वरादिव्यवहारः 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ. ४-४-२२) इति। तथा ईश्वरगीतास्वपि – 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥' (गी. १८-६१) इति॥" सू. भा. २-१-१४, पा. २०१.

इति॥ ६॥

अत्र, अविद्याकल्पितनामरूपबीजव्याकरणमेव ब्रह्मणो जगत्कारणत्वम् इति यथोदाहृतभाष्यवाक्यादवगम्यते। एतच्च सृष्टिप्रक्रियापरिशीलने वितत्य प्रदर्शयिष्यामः। अत्र तु जिज्ञासुभिरिदमेव मनसि करणीयं यद् यत्रापि निरस्तसर्वविशेषं ब्रह्म प्रतिपिपादयिषितम्, तत्रापि भाष्यकारैस्तदेव निर्विशेषं ब्रह्म श्रुत्यनुसारेण जगत्कारणमिति व्यवह्रियते, ईश्वरशब्देन व्यपदिश्यते च इति। तद्यथा –

(२) " एवं प्राप्ते अभिधीयते – योऽयम् अदृश्यत्वादिगुणको भूतयोनिः, स परमेश्वर एव स्यान्नान्य इति। कथमेतदवगम्यते? धर्मोक्तेः। परमेश्वरस्य हि धर्म इहोच्यमानो दृश्यते ॥ "

सू. भा. १-२-२१, पा. ८३.

इति अक्षरशब्दवाच्यस्यैव भूतयोनित्वं परमेश्वरत्वं चोक्तम्; अक्षरशब्दोक्तं चेह निर्विशेषं ब्रह्म। तथा –

(३) " सा चाम्बरान्तधृतिः, परमेश्वरस्यैव कर्म। कस्मात्? प्रशासनात्। प्रशासनं हीह श्रूयते 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ. ३-८-९) इत्यादि। प्रशासनं च पारमेश्वरं कर्म, नाचेतनस्य प्रधानस्य ॥ "

सू. भा. १-३-१०, पा. १०३.

इति भाष्यम्। तत्रापि निरस्तसर्वविशेषस्यैवाक्षरस्य परमेश्वरशब्देन व्यपदेश इति स्पष्टम् ॥

एवं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चापि ब्रह्मणोऽविद्याकल्पितनामरूपकार्यापेक्षयैव व्यवहारावस्थादृष्ट्या, निरस्तसर्वोपाधिके निर्विशेषे ब्रह्मणि परमार्थतस्तदनुपपत्तेरित्यवगन्तव्यम्। तदप्युक्तं भाष्ये –

(१) " यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति, सोऽसर्वज्ञः इति विप्रतिषिद्धम् " सू. भा. १-१-५, पा. २७.

(२) " सवितृप्रकाशवद् ब्रह्मणो ज्ञानस्वरूपनित्यत्वे ज्ञान-साधनापेक्षानुपपत्तेः। अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रौ चेमौ ईश्वरस्य शरीराद्यनपेक्षताम्, अनावरणज्ञानतां च दर्शयतः 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६-८) इति; 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्॥' (श्वे. ३-१९) इति च॥ " सू. भा. १-१-५, पा. २७, २८

इति। अत्र हि अद्वितीयस्यापि ब्रह्मणः स्वरूपमेव ज्ञानं शक्तिश्चेति व्यपदिश्यते ज्ञेयापेक्षया कार्यापेक्षया चेति स्फुटम् ॥ ७ ॥

## ४. ब्रह्मणो जगत्कारणत्वव्यवहारः

ब्रह्मणः कूटस्थनित्यचैतन्यस्वरूपस्य सर्वस्याप्यात्मत्वेनावस्थितत्वात्, चिदात्मव्यतिरेकेणानात्मनः स्वातन्त्र्येण स्थितेश्चिन्तयितुमप्यशक्यत्वाच्च ब्रह्मणि सर्वमिदं जगत् कल्पितमेवाविद्यया इति युक्तम्। तथा च श्रुतिः 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६-८-७) इति चेतनाचेतनात्मकस्य जगतो ब्रह्मैवात्मा, तदेव च परमार्थतः सत्यम् – इत्याह ॥

या पुनः श्रुतिर्जगतः कार्यत्वं ब्रह्मणस्तत्कारणत्वं च ब्रुवाणा, सा ब्रह्मात्मैकत्वावधारणार्थैव न तु कार्यकारणभावस्य सत्यतां वक्तुं

प्रवृत्ता ; यतः सा कार्यस्य मिथ्यात्वमेवाह, न तु सत्यत्वमपि, येन ब्रह्मणः प्रपञ्चकारणत्वपरेति कल्प्येत । तथाहि 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इति छान्दोग्यश्रुतिरेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्र दृष्टान्तापेक्षायाम् आह 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६-१-४) इति । अस्यार्थः – 'एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावादि मृदात्मकमेवेति यथा विज्ञायते । न तु घटशरावादिकं स्वत एवास्ति, वाचारम्भणमात्रत्वाद् विकारस्य, नामधेयमात्रं हि तत् ; एवं दार्ष्टान्तिकेऽपि कार्यभूतं जगन्नाम नास्त्येव वस्तुतः, नाममात्रं हि तत् । यथा च दृष्टान्ते घटशरावादिविकारो वस्तुतो मृत्तिकेत्येव सत्यम्, एवं दार्ष्टान्तिकेऽपि सर्वमपि विकारभूतं जगत् सद्ब्रह्मेत्येव सत्यम्'– इति । तेन लोकेऽपि तावत् कार्यं नाम कारणादन्यन्नास्त्येव इति श्रुतेरभिप्राय इति गम्यते । अत एव हि श्रुतयः 'इदं सर्वं यदयमात्मा' (बृ. २-४-६), 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२) – इत्यादयो ब्रह्मात्मैकत्वमेवावधारयन्ति । एतेन कार्यभूतं बहुप्रपञ्चं जगत् कारणभूताद् ब्रह्मणोऽनन्यदेव वस्तुत इति गम्यते । तदाह भाष्यकारः –

> "तस्मात्, यथा घटकरकाद्याकाशानां महाकाशादनन्यत्वम्, यथा च मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वम्, दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वात्, एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभावः – इति द्रष्टव्यम्"
>
> सू. भा. २-१-१४, पा. १९७.

इति । आह च सर्वस्यापि द्वैतप्रपञ्चस्य मायामात्रत्वं संप्रदायविद् भगवान् श्रीगौडपादाचार्यः –

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ (गौ. का. १-१७.)

इति । तस्मात्, जगन्नाम ब्रह्मणः कार्यभूतं न किञ्चिद् वस्तुत एवोत्पद्यते, नापि केनचिदुपायेन निवर्त्यते । वेदान्तविहितब्रह्मात्मैकत्वज्ञानेन तु तस्य मायामात्रत्वं ब्रह्मणोऽनन्यत्वं च ज्ञाप्यते – इति ज्ञेयम् ॥ ८ ॥

यत्रापि ब्रह्म 'बहु स्याम्' इति संकल्प्य जगद्रूपेणाभवत्–इति श्रूयते 'सोऽकामयत बहु स्यां प्रजायेयेति ।' (तै. २-६), 'तदैक्षत बहु स्यां प्रजायेयेति' (छां. ६-२-३) इति, 'तदात्मानं स्वयमकुरुत' (तै. २-७) – इत्येवमादिरीत्या ब्रह्मणो विकारात्मना स्वयमेव विपरिवर्तनं च, तत्रापि अविद्याकल्पितेन नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेनैव रूपेण ब्रह्म परिणमयामासात्मानम् – इति व्याख्येयम् । 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' (बृ. ४-४-२५), 'स एष नेतिनेत्यात्मा' (बृ. ३-९-२६), 'अस्थूलमनणु' (बृ. ३-८-८) – इत्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थात्मावगमात्, परिणामश्रुतीनां यथोक्तनीत्या आविद्यकरूपभेदविषयत्वेन सावकाशत्वोपपत्तेः । कूटस्थत्वप्रतिपादकश्रुतीनां स्वप्रकरणस्थानां निरवकाशत्वात्, अनुभवानुसारेणाऽऽत्मस्वरूपप्रतिपादनेन बलीयस्त्वोपपत्तेश्च ॥ ९ ॥

अपि च चेतनाचेतनसंयुक्तस्य कृत्स्नस्यैव जगतः कारणं ब्रह्मेति श्रूयते 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्म ' (तै. ३-१) इति, ' सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ' (छां. ६-८-४) इति चैवम् । न च तत्र कार्यनियतपूर्वकालवर्तित्वलक्षणं कारणत्वं विवक्षितमिति वक्तुं शक्यते । कालदेशकार्यकारणभाव-समाश्रयभूतमेव हि जगन्नाम । यथाह भाष्यकारो जन्माद्यधिकरणार्थ-व्याख्यानावसरे –

" अस्य जगतः नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्, सर्वशक्तेः, कारणाद् भवति, ' तद् ब्रह्म ' इति वाक्यशेषः ॥ " सू. भा. १-१-२, पा. ७.

इति । न च कालदेशकार्यकारणभावातीतं ब्रह्म कालाकाशादीनामपि कारणत्वेन श्रूयमाणं वस्तुवृत्तेनैव लोकसिद्धलक्षणं कारणं भवितुमर्हति । न च स्वयं कालदेशाद्याश्रयभूतं जगदिदम् आधेयतासंबन्धेन स्वानन्त-भूतकालान्तरसंबद्धम् इति चिन्तितुमपि शक्यम्, येन लोकसिद्ध-कार्यत्वलक्षणाक्रान्तं तदिति शक्यकल्पनं भवेत् । तस्मात्, यदात्म-कत्वमिदं जगत् सृष्टिस्थितिप्रलयेषु न जहाति, तदेव सर्वविकल्पास्पदं ब्रह्माविद्यया एतद्रूपेणावभासते – रज्जुरिव सर्परूपेण – इत्यतोऽस्य जगतः 'कारणम्' इति परिभाष्यते इत्येव कल्पनीयम् । अत एव हि श्रुतिः ' अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र

भूताच्च भव्याच्च ' (का. १-२-१४) इति कार्यकारणभाववर्जितम्, भूतभविष्यत्कालसंपर्करहितं च ब्रह्म – इतिं दर्शयति ॥ १० ॥

किं च, अनेककर्तृभोक्त्राश्रितमिदं जगदिति सर्वेषां नः प्रत्यक्षमेतत् । कर्तृभोक्तृरूपत्वं च ज्ञातृत्ववदेव शरीरेन्द्रियमनःस्वहंममाभिमानकृतम् आध्यासिकमेवेत्यधिगतमित्यतो ब्रह्मण्येव कर्तृत्वभोक्तृत्वलक्षणं जीवत्वम् अविद्यया कल्पितमित्यपि प्राप्नोति । अथ च क्वचित् क्वचित् श्रुतौ जीवानां ब्रह्मणः सकाशादुत्पत्तिर्दर्शिता । ' यथोर्णनाभिस्तन्तुनोच्चरेद्यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्ति ' (बृ. मा. २-१-२३), ' यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ' (मुं. २-१-१) इति चैवम् । अत्र हि भोग्यजातस्येव भोक्तॄणां जीवानामपि पृथक् सृष्टिः शिष्यते, अचेतनानामिव चेतनानामपि प्रलयश्च, ' इदं सर्वमसृजत ' (तै. २-६), ' विज्ञानं चाविज्ञानं च ' (तै. २-६) इत्यादिश्रुतिभ्यश्च जीवानामुत्पत्तिर्विज्ञायते । तत्र ' न जीवो म्रियते ' (छां. ६-११-३), ' तत्त्वमसि ' (छां. ६-८-७) इति च जीवस्य नित्यत्वं ब्रह्माभिन्नत्वं च श्रूयमाणं निरवकाशं नान्यथा नेतुं शक्यम् इत्यतो जीवोत्पत्तिश्रुतय एवान्यथा नेतव्याः । **यथोक्तमभियुक्तैः –**

" आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनम् ॥ " (गौ. का. ३-३)

इति । व्याख्यातं चैतद् भाष्यकारैः –

" जीवात्मनां हि परस्मादात्मन उत्पत्तिर्या श्रूयते वेदान्तेषु, सा महाकाशाद् घटाकाशोत्पत्तिसमा न परमार्थतः – इत्यभिप्रायः । तस्मादेवाकाशाद् घटादयः संघाता यथा उत्पद्यन्ते, एवम् आकाशस्थानीयात् परमात्मनः पृथिव्यादिभूतसंघाता आध्यात्मिकाश्च कार्यकरणलक्षणा रज्जुसर्पादिवद् विकल्पिता जायन्ते । अत उच्यते 'घटादिवच्च संघातैः' इति । यदा मन्दबुद्धिप्रतिपिपादयिषया श्रुत्या आत्मनो जातिरुच्यते जीवादीनाम्, तदा जातौ उपगम्यमानायाम् एतन्निदर्शनं दृष्टान्तः, यथोदिताकाशवदित्यादिः ॥ " गौ.का.भा. ३-३, पा. २०९ इति ॥ ११ ॥

तदेवं ब्रह्मण एव 'सोऽकामयत, बहु स्यामिति' इति सङ्कल्पपूर्वकबहुभवनश्रुतेः, जगदुपादानत्वं तत्कर्तृत्वं चेति स्थितम् । तदेतद् ब्रह्मणः कर्तृत्वं न कुलालादेरिव साधनान्तरोपसंग्रहपूर्वकम्, किं तु स्वाभाविकमेव परिपूर्णशक्तिमत्त्वाद् ब्रह्मणः । उपादानत्वं च न मृदादेरिवावयवविन्यासविशेषमाश्रित्य कार्यरूपेणावस्थानम् 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ६–१९) इति निरवयवत्वनिष्क्रियत्वश्रुतेः, किं तर्हि स्वाभाविकमेव 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥' (गौ. का. १–९) इत्यभियुक्तोक्तेः । नित्यतृप्तत्वात् परमेश्वरस्य स्वविभूतिख्यापने, स्वेच्छापरिपूर्तौ वा सृष्ट्यर्थम्, सामग्र्युपसंहारे वा न स्पृहा । अतोऽविद्यास्वभावमात्रफलमिदं यच्चेतनाचेतनजगल्लक्षणकार्यरूपेणावभासः – इति श्लोकाभिप्रायः । यथोक्तं भाष्यकारेण –

" अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारा-

स्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतम् अपरिणतम् अवतिष्ठते ॥ ” सू. भा. २-१-२७, पा. २१३.

इति ॥

यदपि, एकविज्ञानेन सर्वस्याप्यन्यस्याविज्ञातस्य विज्ञानं भवतीति प्रतिज्ञा श्रौती, ये च मृदादिदृष्टान्ताः, तेषामविरोधाय सूत्रणं च ‘प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्’ (सू. १-४-२३) इति, यदपि च दृष्टान्तोपादानम् ‘उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि’ (सू. २-१-२४), ‘देवादिवदपि लोके’ (सू. २-१-२५) इति भगवतो बादरायणस्य । भाष्यं च –

(१) “ परिपूर्णशक्तिकं तु ब्रह्म, न तस्यान्येन केनचित् पूर्णता संपादयितव्या । श्रुतिश्च भवति ‘न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च’ (श्वे. ६-८) इति । तस्मात्, एकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद् विचित्रपरिणाम उपपद्यते ॥ ”

सू. भा. २-१-२४, पा. २१०.

(२) “ यथा हि कुलालादीनां देवादीनां च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयः, तथा ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यत इत्येतावद् वयं विवक्ष्यामः । तस्मात्, यथैकस्य सामर्थ्यं दृष्टम्, तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्तः ॥ ” सू. भा. २-१-२५, पा. २११.

इति, न तत्र वास्तविकमेव जगत्कारणत्वं सर्वशक्तित्वं चाभिप्रेतमिति मन्तव्यम्, किं तर्हि, ब्रह्मणोऽन्यस्य जगत्कारणत्वं तथाविधशक्तिमत्त्वं च न संभवतीत्येतावत्परं तत् । न हि ब्रह्मव्यतिरेकेण कारणत्वलक्षणो

धर्मः शक्तिर्वा तथ्यत एव तस्यास्तीति कल्पयितुं शक्यते। तथा चाहान्यत्र भाष्यकृत् –

(३) "शक्तिश्च कारणस्य कार्यनियमार्थं कल्प्यमाना नान्या असती वा कार्यं नियच्छेत्। असत्त्वाविशेषात्, अन्यत्वाविशेषाच्च। तस्मात्, कारणस्यात्मभूता शक्तिः, शक्तेश्चाऽऽत्मभूतं कार्यम्॥"

सू. भा. २-१-१८, पा. २०४.

इति। तस्मात् आत्मनः परिणामो नाम जगद्रूपेणावभासमात्रम् इत्यवगन्तव्यम्॥

न चैकान्तेनाद्वितीयस्यैव सतो ब्रह्मणः कथं विचित्रजगद्रूपेणावभासः स्यात् इति शङ्क्यम्। यतस्तत्राप्युपपत्तिमाह सूत्रकारः – 'आत्मनि चैवं विचित्राश्च हि' (सू. २-१-२८) इति। व्याख्याति स चैतत् भाष्यकारः –

(४) "अपि च नैवात्र विवदितव्यम्, कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति। यत आत्मन्यप्येकस्मिन् स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ. ४-३-१०) इत्यादिना। लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते। तथा, एकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैव अनेकाकारा सृष्टिर्भविष्यतीति॥

सू. भा. २-१-२८, पा. २१४.

इति॥ १२॥

स एष मायासत्कार्यवाद इति परिभाषा। सत एव कारणस्य मायया कार्यरूपेण जन्म, कारणात्मना सत एव कार्यस्य मायया जन्म – इत्यभिप्रायेणैवमभिधीयते। न तु वस्तुत एव ब्रह्मणः

कार्यभूतजगद्रूपेण जन्म । साङ्ख्यानां तु वस्तुभूतस्यैव प्रधानस्य वस्तुभूतेनैव महदादिरूपेण जन्मेष्यते । तेषां च पक्षे तत्त्वत एव जायमानस्य कार्यस्य कारणभूतं प्रधानं स्वयमपि किं न जायते ? – इत्याशङ्का स्यात्, विकाराणां विकारेभ्य एवोत्पत्तिदर्शनात् । न त्विह सन्मात्रस्य ब्रह्मणः सन्मात्रादेवोत्पत्तिः संभाव्यते, उत्पद्यमानस्य विशेषाभावे प्रकृतिविकारभावानुपपत्तेः । सत्त्वस्यैकत्वेन सदन्तराभावाच्च । नापि सद्विशेषात्, दृष्टविपर्ययात् । सामान्याद् हि विशेषा उत्पद्यमाना दृष्टाः । नाप्यसतस्तदुत्पत्तिः ; निरात्मकत्वादसतः । जातादेव जायत इत्यभ्युपगमे तु अनवस्था प्रसज्येत । तस्मात् माययैव सतो जन्माभ्युपगन्तव्यम् । न चासतः कस्यचित् कथञ्चिदपि जन्म संभवति । असतो निरात्मकत्वादेव वन्ध्यापुत्रवत् । तदुक्तम् –

> **सतो हि मायया जन्म युज्यते न तु तत्त्वतः ।**
> **तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥**
> **असतो मायया जन्म तत्त्वतो नैव युज्यते ।**
> **वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते ॥**
>
> **गौ. का. ३-२७, २८.**

इति ॥ १३ ॥

मायासत्कार्यवादे तु न कश्चिद्दोषः । मायाकार्यस्य जगतः प्रागुत्पत्तेरुत्पन्नस्य च कारणभूतब्रह्मात्मनैव सत्त्वाभ्युपगमात् । तथा हि भाष्यकारेण –

(१) '**ननु शब्दादिहीनं ब्रह्म जगतः कारणम् ।**'

इत्याशङ्क्य परिहृतम्

" बाढम् ; न तु शब्दादिमत्कार्यं कारणात्मना हीनं प्रागुत्पत्ते- रिदानीं वा अस्ति । तेन न शक्यते वक्तुं प्रागुत्पत्तेरसत् कार्यमिति । "

सू. भा. २-१-७, पा. १८९

इति ॥

" इतश्च कारणात् कार्यस्यानन्यत्वम्, यत्कारणं प्रागुत्पत्तेः कारणा- त्मनैव कारणे सत्त्वम् अवरकालीनस्य कार्यस्य श्रूयते ' सदेव सोम्येदमग्र आसीत् ' (छां. ६-२-१), ' आत्मा वा इदमेक एवाग्र आसीत् ' (ऐ. १-१-१) इत्यादौ इदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधि- करण्यात् । यच्च यदात्मना यत्र न वर्तते, न तत्तत उत्पद्यते । यथा सिकताभ्यस्तैलम् । तस्मात्, प्रागुत्पत्तेरनन्यत्वात्, उत्पन्नमप्यनन्यदेव कारणात् कार्यम् - इत्यवगम्यते । यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति । एकं च पुनः सत्त्वम् । अतोऽप्यनन्यत्वं कारणात् कार्यस्य ॥ "

सू. भा. २-१-१६, पा. २०२

इति च ॥ १४ ॥

एतेन—किं निमित्तेयं सृष्टिः ? कथमकार्यकरणः सन्नीश्वरः सृजति जगत् ? किमुपकरणः सन् सृजति सः ? कथं विषमां सृष्टिं विदधत- स्तस्य न वैषम्यनैर्घृण्ये ? कथं वा स्वतन्त्रस्य तस्य प्रेक्षावतः सतो दुःखबहुलसंसारसर्जने प्रवृत्तिः, प्रवेशश्च सृष्टौ जीवात्मना ? कथं च तस्य निरवयवस्यैव जगदात्मना परिणामः ? कथं च श्रुतिषु सृष्टेरन्य- थान्यथा वर्णनम् ? न हि वस्तुनि विकल्प उपपद्यते ? — इत्यादयः सर्वाः शङ्काः परिहृता भवन्ति । परमार्थविषयत्वाभावात् सृष्टिश्रुतेः, आत्मैकत्वप्रतिपादनपरत्वाच्च । यथोक्तमभियुक्तैः —

' मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥'

गौ. का. ३-१५

इति ॥ १५ ॥

यद्यपि अजाद्वयात्मतत्त्वमेकमेव परमार्थः, तथापि मन्दमध्यमाधिकारिणां कृते श्रुतिषु स्मृतिषु च सृष्टिः प्रतिपाद्यते, परमेश्वरस्य नित्यशुद्धबुद्धमुक्तस्यापि सृष्टिविषयकज्ञानचिकीर्षाकृतयश्च विज्ञाप्यन्ते । मन्दमध्यमाधिकारिणोऽपि क्रमक्रमेण परमार्थाद्वैततत्त्वं कथं नाम बुध्येरन्निति । तेषामेव च कृते सृष्टिविषयकाः शङ्काः समाधीयन्ते व्यवहारदृष्ट्यापि कथं ते श्रुतिवाक्यार्थविचारणे प्रवृत्ताः श्रद्धां बध्नीयुस्तत्प्रामाण्ये इति । तथा ह्युक्तमभियुक्तैः—

उपलम्भात् समाचारादस्तिवस्तुत्ववादिनाम् ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥
अजातेस्त्रसतां तेषामुपलम्भाद्वियन्ति ये ।
जातिदोषा न सेत्स्यन्ति दोषोऽप्यल्पो भविष्यति ॥

गौ. का. ४-४२, ४३

इति । व्याख्यातं चैतद् भाष्यकारेण —

(१) "अस्ति वस्तुभावः इत्येवंवदनशीलानां दृढाग्रहवतां श्रद्दधानानां मन्दविवेकिनामर्थोपायत्वेन सा देशिता जातिः । 'तां गृह्णन्तु तावत् ; वेदान्ताभ्यासिनां तु स्वयमेवाजाद्वयात्मविषयो विवेको भविष्यति' इति । न तु परमार्थदृष्ट्या । ते हि श्रोत्रियाः स्थूलबुद्धित्वात्, अजातेः, अजातिवस्तुनः सदा त्रस्यन्ति । आत्मनाशं मन्यमानाः अविवेकिनः"

इति ॥

"तेषां अजातेस्त्रसतां श्रद्धधानानां सन्मार्गावलम्बिनां जातिदोषा जात्युपलम्भकृता दोषा न सेत्स्यन्ति सिद्धिं नोपयास्यन्ति । विवेकमार्गप्रवृत्तत्वात् । यद्यपि कश्चिद् दोषः स्यात्, सोऽल्पतर एव भविष्यति, सम्यग्दर्शनाप्रतिपत्तिहेतुकः इत्यर्थः"

गौ. का. भा. ४-४२, ४३, पा. २४०, २४१

इति च ॥ १६ ॥

या पुनः श्रुतिः 'तदैक्षत बहु स्यां प्रजायेयेति' (छां.६-२-३) 'स ईक्षत इमान् लोकान्नु सृजा इति' (ऐ. १-१-१) – इत्येवं परमात्मनः सृष्टिविषयकेक्षणाख्यज्ञानोपदेशिनी, न सा लोकदृष्टप्रासादादिनिर्मातृतक्षकादेरिवेश्वरस्य कार्योपादानविषयकापरोक्षज्ञानं क्वचित्काले अभूदिति ब्रूते । न हि नित्यज्ञानस्वरूपस्येश्वरस्य देहेन्द्रियाद्यपेक्षा ज्ञानोत्पत्तिः कादाचित्की भवतीति समञ्जसं स्यात् । तदुक्तं भगवता भाष्यकारेण –

"अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य । मन्त्रौ चेमौ ईश्वरस्य शरीराद्यनपेक्षताम् अनावरणज्ञानतां च दर्शयतः – 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६-८) इति ; 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥' (श्वे. ३-१९) इति च"

सू. भा. १-१-५, पा. २७

इति । तस्मात्, 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' (मुं. १-१-९) इति श्रुतिपरामृष्टं ज्ञानस्वभावमेव व्याचिकीर्षितनामरूपावभासकं विज्ञापयति यथोदाहृता ईक्षणश्रुतिरित्यवधेयम् । एवं 'सोऽकामयत'

(तै. २-६) इति श्रुतिरपि न सृष्टिविषयकचिकीर्षाप्रतिपादनपरा, ईश्वरः स्रष्टव्यं नामरूपात्मकं प्रपञ्चं बुद्धौ आकलय्य 'इदं करिष्यामि' इति सङ्कल्पयति, कामप्रेरितश्च भवतीति । तदुक्तं तैत्तिरीयभाष्ये –

"यथा अन्यान् परवशीकृत्य कामादिदोषाः प्रवर्तयन्ति, न तथा ब्रह्मणः प्रवर्तकाः कामाः, कथं तर्हि, सत्यज्ञानलक्षणाः स्वात्मभूतत्वाद् विशुद्धाः न तैर्ब्रह्म प्रवर्त्यते । तेषां तु तत् प्रवर्तकं ब्रह्म प्राणिकर्मापेक्षया"

तै. भा. २-६, पा. २९८

इति । तस्मात् स्वभावानतिरिक्त एव कामः प्राणिकर्मापेक्षया जात इवेति व्याख्येयं वाक्यम् । एवं 'तत्तेजोऽसृजत' (छां. ६-२-३), 'स इमाल्लोकानसृजत' (ऐ. १-१-२) इत्याद्याः श्रुतयोऽपि न सृष्टि-रूपकृतिप्रतिपादनपराः, अकार्यकरणस्य निष्क्रियस्य कूटस्थनित्यस्येश्वरस्य तादृशप्रवृत्त्यनुपपत्तेः ; किं तर्हि स्वरूपेणैव स्थितस्य तस्य संनिधिमात्रेण तथाविधा मायिकी सृष्टिरभूत् स्रष्टव्यप्राणिकर्मानुगुणम्– इत्यभिप्राय-कास्ताः । एवं 'स वा एष महानज आत्माऽन्नादो वसुदानः' (बृ. ४-४-२४) इत्यादिरीश्वरस्य प्राणिकर्मफलदातृत्वाभिधायिनी श्रुति-रप्येवमेव व्याख्यातव्या –

(१) "तदेव चेश्वरस्य फलहेतुत्वं यत् स्वकर्मानुरूपाः प्रजाः सृजति" सू. भा. ३-२-४१ पा. ३७५

(२) "ईश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति ; देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येव असाधारणानि कर्माणि कारणानि भवन्ति । एवम् ईश्वरः सापेक्षत्वात् न वैषम्यनैर्घृण्याभ्यां दुष्यति" सू. भा. २-१-३४, पा. २१७, २१८

इति च भाष्यात् ॥ १७ ॥

किं बहुना ? सृष्टिप्रक्रियायां ये ये दोषाः शङ्क्यन्ते, ते सर्वेऽपि मायिककार्यकारणवादाभ्युपगमेनैव दूरीकृता भवन्ति । अद्वितीयस्यैव सतो ब्रह्मणः तत्त्वान्यत्वाभ्यामनिर्वचनीयया अविद्याकल्पितनामरूपलक्षणया मायया जगज्जन्मादिकारणत्वसर्वेश्वरत्वसर्वज्ञत्वसर्वशक्तित्वादिसर्वव्यवहाराणामुपपादनात्, वास्तविककर्तृत्वोपादानत्वादीनाम् अनभ्युपगमात्, ब्रह्मात्मैकत्वज्ञानोपायत्वेनैवाध्यारोपदृष्ट्या श्रुतिषु तदङ्गीकारात्, व्यावहारिकदृष्ट्या मन्दमध्यमाधिकारिणां कर्मोपासनाद्यनुष्ठानेषूपयोक्ष्यमाणत्वाच्च कार्यकारणभावादिप्रक्रियाणाम् । तथा ह्याह भाष्यकारः पदेपदे–

(१) "प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः संभवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव"

सू. भा. २-१-३१, पा. २१५

(२) "न चेयं परमार्थविषया सृष्टिश्रुतिः ; अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्, ब्रह्मात्मभावप्रतिपादनपरत्वाच्च–इत्येतदपि नैव विस्मर्तव्यम् ॥" सू. भा. २-१-३३, पा. २१७

(३) "एकत्वात् प्रवर्त्याभावे प्रवर्तकत्वानुपपत्तिरिति चेत्, न; अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेन असकृत् प्रत्युक्तत्वात् ॥"

सू. भा. २-२-२, पा. २२२, २२३

(४) "न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था, तत्प्रतिपत्तौ फलानवगमात् । सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा, तत्प्रतिपत्तौ फलानवगमात् । 'स एष नेतिनेत्यात्मा' इत्युपक्रम्याह 'अभयं वै जनक प्राप्तोऽसि' (बृ. ४-२-४) इति । तस्मात् अस्मत्पक्षे न कश्चिदपि दोषप्रसङ्गोऽस्ति ॥" सू. भा. २-१-२७, पा. २१४

(५) "न च यथा ब्रह्मण आत्मैकत्वदर्शनं मोक्षसाधनम्, एवं जगदाकारपरिणामित्वदर्शनमपि स्वतन्त्रमेव कस्मैचित्फलायाभिप्रेयते। प्रमाणाभावात्। कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रम् 'स एष नेतिनेत्यात्मा' इत्युपक्रम्य 'अभयं वै जनक प्राप्तोऽसि' इत्येवंजातीयकम्। तत्रैतत् सिद्धं भवति ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्तत्राफलं श्रूयते ब्रह्मणो जगदाकारपरिणामित्वादि तद् ब्रह्मदर्शनोपायत्वेनैव विनियुज्यते। 'फलवत्सन्निधौ अफलं तदङ्गम्' इतिवत्।" सू. भा. २-१-१४, पा. २००

(६) "सूत्रकारोऽपि परमार्थाभिप्रायेण 'तदनन्यत्वम्' इत्याह। व्यवहाराभिप्रायेण तु 'स्याल्लोकवत्' (सू. २-१-१३) इति महासमुद्रस्थानीयतां ब्रह्मणः कथयति। अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां चाऽऽश्रयति सगुणेषूपासनेषूपयोक्ष्यत इति"

सू.भा. २-१-१४, पा. २०१, २०२.

(७) "चेतनं ब्रह्म जगतः कारणं प्रकृतिश्च–इत्यस्मिन् अवधारिते वेदार्थे परैरुपक्षिप्तान् विलक्षणत्वादीन् दोषान् पर्यहार्षीदाचार्यः। इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणं प्रारिप्समाणः स्वपक्षपरिग्रहप्रधानं प्रकरणम् उपसंहरति 'यस्मात्, अस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्माः उपपद्यन्ते 'सर्वज्ञं सर्वशक्ति महामायं च ब्रह्म' इति, तस्मात् अनतिशङ्कनीयम् इदमौपनिषदं दर्शनम् इति" सू. भा. २-१-३७, पा. २१९

इत्यादिभिर्वचनैः। एतेन इयमप्याशङ्का परिहृता भवति या कैश्चिदुत्थाप्यते 'यदि ब्रह्मणो नैव जगत्कारणत्वमभिप्रेतं भगवतः सूत्रकृतः, तर्हि किमिति तेनैव प्रतिज्ञायते 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (सू. १-४-२३) इति, 'साक्षाच्चोभयाम्नानात्' (सू. १-४-२५)

इति चाभिन्ननिमित्तोपादानकारणत्वं ब्रह्मणः ? किमिति वा केवलनिमित्तकारणत्वं प्रतिषिध्यते 'पत्युरसामञ्जस्यात्' (सू. २-२-३७) 'अधिष्ठानानुपपत्तेश्च' (सू. २-२-३९), इति च ? कथं च समञ्जसं स्यात् ? 'जन्माद्यस्य यतः' (सू. १-१-२) इति संसूत्रणम्, सांख्याद्यचेतनकारणवादखण्डनं वा विस्तरशः, कारणत्वमेव ब्रह्मणोऽनिच्छतः ? " इति । ब्रह्मणः पारमार्थिककारणत्वानभ्युपगमेऽपि अविद्याकल्पितमायावशेन परिणामित्वस्याप्यभ्युपगमात् – इत्यवधेयम् ॥ १८ ॥

## ५. सृष्टिप्रलयव्यवहारः

तदेवं सृष्टेः पारमार्थिकत्वाभावादेव श्रुतयोऽन्यथान्यथा सृष्टिं वर्णयन्ति । सृष्टिप्रतिपादनस्य तु ब्रह्मात्मैकत्वप्रतिपादनोपायमात्रत्वात्, न तत्रैकवाक्यता प्रदर्शने तेषामादरः इति स्थितम् । कारणस्वरूपे तु ब्रह्मणि सर्वासां श्रुतीनां संगानमस्ति । अन्यथान्यथा प्रतिपादनं तु सृष्टेः ययाकयाचित् प्रक्रियया सर्वस्यापि जगतस्तत्त्वतः कारणभूताद् ब्रह्मणो नियमेनानन्यत्वं कथं नु जानीयुर्मुमुक्षव इत्यभिप्रायेण । यथाहुर्वार्तिककाराः 'यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥' (बृ. वा. १-४-४०) इति । अधिकारभेदात्तु प्रतिपत्तॄणां चिराचिरोत्पत्तिरूपं तारतम्यं प्रतिपत्तौ इत्यन्यदेतत् । अत एवाह भाष्यकृत् –

" सत्यपि प्रतिवेदान्तं सृज्यमानेष्वाकाशादिषु क्रमादिद्वारके विगाने न स्रष्टरि किञ्चिद् विगानमस्ति । यथाभूतो ह्येकस्मिन् वेदान्ते

सर्वज्ञः सर्वेश्वरः सर्वात्मा, एकोऽद्वितीयः कारणत्वेन व्यपदिष्टः, तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते '' ॥ सू भा १-४-१४, पा. १६२

इति ॥

(२) '' कार्यविषयं तु विगानं दृश्यते क्वचिदाकाशादिका सृष्टिः क्वचित्तेज आदिका – इत्येवंजातीयकम् । न च कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदान्तेष्वविगीतमधिगम्यमानम् अविवक्षितं भवितुमर्हतीति शक्यते वक्तुम् । अतिप्रसङ्गात् । ....भवेदपि कार्यस्य विगीतत्वं अप्रतिपाद्यत्वात् '' ॥ सू. भा. १-४-१४, पा. १६३

इति च ॥ १९ ॥

यद्यप्येवं श्रुतीनामात्मैकत्वप्रतिपत्त्युपायसमर्पणपरत्वेनैव उत्पत्तिविषयकः प्रस्थानभेदः क्रमादिद्वारको विप्रतिषेधश्च शक्यसमाधानो मायाजातिवादे, अनुमोदितश्चायं वादः कण्ठरवेण शारीरककर्त्रा "आत्मनि चैवं विचित्राश्च हि " (सू. २-१-२८) इति सूत्रे, व्याख्यातश्च भाष्यकृता स्वप्नमायानिदर्शनपूर्वकम्, तथापि क्रमादिविषयकं विगानमपि परिहृतमेव शारीरके 'न वियदश्रुतेः' (सू. २-३-१) इत्यारभ्य । तथा प्रलयक्रमोऽपि सूत्रित एव तेन 'विपर्ययेण तु क्रमोऽत उपपद्यते च' (सू. २-३-१४) इति । युक्तं चैतत् । न हि स्वप्नेऽपि दृष्टो गोवत्सो स्वमातुः पूर्वमेव लब्धजन्मा इति कल्प्यते केनचित् । सप्रयोजना च सृष्टिप्रलयक्रमनिर्धारणा । विप्रतिषेधाभावात् प्रमाणं श्रुतिः – इति मुमुक्षूणां श्रद्धोत्पादकत्वात्, कार्यस्य कारणानन्यत्वात् तस्य तस्य कार्यस्य स्वस्वकारणे लयः – इति क्रमक्रमेण लयचिन्तनेन मूलकारणे एव सर्वस्यात्मभूते ब्रह्मणि सर्वं

प्रलीयते इति ब्रह्मण एव स्वात्मत्वावधारणे सौकर्यकल्पनाच्च मध्यमाधिकारिणोऽनुगृहीताः स्युरिति । अतः क्रमोऽपि जिज्ञासुजनबुद्धिवैशद्यायेह निरूप्यते ॥ २० ॥

तत्र सृष्टिक्रमे तावद् विशेषश्चिन्तितः 'अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्' (सू. २-३-१५) इति । **सूत्रभाष्ये च** तत्रैवमुक्तम् 'भूतोत्पत्तिक्रमो न करणैर्विशिष्यते प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि, प्रथमं वा भूतान्युत्पद्यन्ते चरमं वा करणानीति' (सू. भा. २-३-१५, पा. २७६) इति । तत्र तावत् क्रियायामिव वस्तुनि विकल्पासंभवात् सृष्टिक्रमस्यावश्यनिर्धारणीयत्वे **तैत्तिरीयभाष्यार्थविमर्शिन्यां** विस्तीर्णतरं मीमांस्य **मुण्डकोपनिषदमेवाऽऽश्रित्य** सर्वेषां सृष्टिवाक्यानां एकवाक्यता संपादिता । तत्रत्यो निर्णय एवात्र संक्षेपेणाभिधीयते प्रसक्तानुप्रसक्तं च किञ्चित् ॥

(१) प्रप्रथमं ब्रह्म स्वस्वरूपाऽव्यतिरिक्तेन ज्ञानलक्षणेन तपसा प्राणिकर्मवशात् उत्पादनोन्मुखं भवति । (२) ततो ब्रह्मणः सर्वज्ञात् सर्वशक्तेः, अविद्याकल्पितनामरूपबीजशक्तिरूपम् अव्याकृतमभिजायते, व्याचिकीर्षितावस्थां प्राप्नोति । (३) तस्माच्चाव्याकृतात्, प्राणः, यो ज्ञानशक्तिप्राधान्येन **'हिरण्यगर्भ'** इत्युच्यते, क्रियाशक्तिप्राधान्येन **'वायुः, सूत्रम्'** इति च । स प्रथमं जायते । (४) प्राणात् **मनः** समष्ट्यन्तःकरणतत्त्वम् अभिव्यज्यते । ततः (५) **इन्द्रियाणि*** समुत्पद्यन्ते ।

* अत्र कथम् इन्द्रियाणां भौतिकानां सतां ततः प्रथममेव सृष्टिः ? – इति शङ्का तु 'अन्तरा विज्ञानमनसी' (सू. २-३-१५) इत्यत्रोक्तभाष्योक्ताभौतिकत्वपक्षमवलम्ब्य तैत्तिरीयभाष्यार्थविमर्शिन्यनुसारेण परिहरणीया ॥

(६) ततः **सत्यम्**, मूर्तामूर्तात्मकं **भूतपञ्चकम् सूक्ष्मम्**। तत्राऽऽकाशादीनां सूक्ष्मभूतानाम् यथाक्रमं शब्दस्पर्शरूपरसगन्धा गुणाः, वाय्वादीनां पूर्वपूर्वकारणगुणानुगतत्वात्तु तेषां 'द्विगुणो वायुः', 'त्रिगुणोऽग्निः', 'चतुर्गुणा आपः', 'पञ्चगुणा पृथिवी' – इति च व्यवहारो भवति। (७) तस्मात् सूक्ष्मभूतपञ्चकात् पञ्चीकरणेन **स्थूलं भूतपञ्चकम्, विराट्सृष्टिश्च** भवति। (पञ्चीकरणं नाम तत्तद्भूते इतरेषामपि संयोजनम्, तेन चाऽऽकाशादिषु तत्तद्भूतधात्वंशस्य भूयस्त्वात् 'आकाशः, वायुः'– इत्यादिव्यवहारः प्रचलति। तथा हि **सूत्रम्** 'वैशेष्यात्तु तद्वादस्तद्वादः' (सू. २–४–२२) इति। (८) विराट्पुरुषेण **लोकाः** भूराद्याः सृज्यन्ते। (९) तत्र च विशिष्य भूलोके **ओषधयः**, तरुलतादयश्च जायन्ते। तेभ्योऽन्नम्; ततो मनुष्यादिप्राणिनः वर्णाश्रमक्रमेण **कर्माणि तत्फलानि** च सृष्टानि भवन्ति। इत्येवं संक्षेपेण सृष्टिक्रमः। तत्र परमेश्वरः प्रथमं ब्रह्माणं सृष्ट्वा तद्द्वारेण लोकादीन् सृजतीति विशेषः 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे. ६–१८), 'आत्मैवेदमग्र आसीत्पुरुषविधः' (बृ. १–४–१) 'आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत' (?)–इत्यादिश्रुतिस्मृतिप्रामाण्यादवगन्तव्यः ॥ २१ ॥

अत्र यद्यपि पूर्वस्मात् पूर्वस्मात् कारणात् उत्तरमुत्तरं कार्यं भवतीति क्रमनियमः प्रतिपादितः, तथापि सर्वत्रापि तत्तदात्मनावतिष्ठमानः परमेश्वर एव तत् तत् कार्यं सृजतीत्येव बोध्यम्। विकाराणां वाचारम्भणमात्रत्वात् अचेतनत्वाच्च प्रतीयमानरूपेण तेषां स्रष्टृत्वानु-

पपत्तेः, परमार्थतः कूटस्थचैतन्यरूपादीश्वरादनन्यत्वाच्च । आकाशादीनां कारणत्वोक्तिस्तु व्यवहारदृष्ट्या, लयचिन्तनसौकर्यार्थमिति न प्रसर्तव्यम् । अन्यथा हि अचेतनानामेव कारणत्वोपगमे साङ्ख्यादिराद्धान्तादविशेषः स्यात् ; न चाचैतन्यकारणवादः कथमप्युपपद्यत इति । तदुक्तं भाष्ये –

> " स एव परमेश्वरस्तेन तेनाऽऽत्मना अवतिष्ठमानोऽभिध्यायन् तं तं विकारं सृजति । यत्तु .... ईक्षणश्रवणम् अप्तेजसोः तत् परमेश्वरावेशवशादेव द्रष्टव्यम् 'नान्योऽतोऽस्ति द्रष्टा' (बृ.३-७-२३) इतीक्षित्रन्तरप्रतिषेधात् । प्रकृतत्वाच्च सत ईक्षितुः" सू भा. २-३-१३, पा. २७४

इति । एवं च मायासत्कार्यवादो निराबाधस्तिष्ठतीति ज्ञेयम् ॥ २२ ॥

एतेन पृथिव्यादीनां प्रलयक्रमोऽपि व्याख्यातो वेदितव्यः । कार्यस्य हि कारणे प्रलयो लोके दृष्टः, अतः उत्पत्तिक्रमात् विपर्ययेणैव प्रलयक्रमो भवितुमर्हतीति । आह च भाष्यकारः –

> " विपर्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद् भवितुमर्हति । तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढः, ततो विपरीतेन क्रमेणावरोहतीति । अपि च दृश्यते मृदो जातं घटशरावादि अप्ययकाले मृद्भावमप्येति, अद्भ्यश्च जातं हिमकरकादि अब्भावमप्येतीति । अतश्चोपपद्यत एतत् यत् पृथिवी अद्भ्यो जाता सती स्थितिकालव्यतिक्रान्तौ अपोऽपीयात्, आपश्च तेजसो जाताः सत्यस्तेजोऽपीयुः । एवंक्रमेण सूक्ष्मं सूक्ष्मतरं चानन्तरमनन्तरं कारणम् अपीत्य सर्वं कार्यजातं परमकारणं च ब्रह्माप्येतीति वेदितव्यम् । न हि स्वकारणव्यतिक्रमेण कारणकारणे कार्याप्ययो न्याय्यः ॥ " सू. भा. २-३-१४, पा. २७५

इति ॥ २३ ॥

## ६. जीवस्य जन्मादिव्यवहारः

तदेवं जगतो जन्मादि मायिकमेव, परमार्थस्तु तस्य सृष्टि-स्थितिप्रलयेषु सर्वदापि स्वकारणभूतब्रह्मानन्यत्वमेव ; जीवानां च क्वचिज्जन्म श्रूयमाणं घटाकाशमहाकाशन्यायेनैव व्याख्येयम् – इति स्थितम् । तथा च जीवानां सर्वेऽपि व्यवहारा घटाकाशमहाकाश-व्यवहारवदेव बोद्धव्या इत्युन्नेतुं शक्यम् । उक्तं चाभियुक्तैः –

घटादिषु प्रलीनेषु घटाकाशादयो यथा ।
आकाशे संप्रलीयन्ते तद्वज्जीवा इहात्मनि ॥
यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥
रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।
आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥
नाकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवात्मनः सदा जीवो विकारावयवौ तथा ॥
यथा भवति बालानां गगनं मलिनं मलैः ।
तथा भवत्यबुद्धानामात्मापि मलिनो मलैः ॥
मरणे संभवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु चाकाशेनाविलक्षणः ॥
संघाताः स्वप्नवत् सर्वे आत्ममायाविसर्जिताः ।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥

गौ. का. ३-४....१०.

इति । सर्वथापि यथा आकाशस्यैकस्यैव सतः उत्पत्ति-नाश-मालिन्या-मालिन्य-रूपकार्यसमाख्याभेद-गत्यागत्यादिव्यवहाराः घटाद्युपाधिकृता एव, यथा चाकाशस्य घटाद्याकाशा न विकारा नाप्यंशाः, एवमेव

जीवानाम् उत्पत्त्यादिव्यवहारा उपाधिकृता एव, भेदगत्यागत्यादिव्यवहारा अप्यौपाधिका एव, रूपकार्यसमाख्याकृतभेदाश्च तथैवोपाधिकृता न पारमार्थिकाः। यथा च आकाशकार्यपृथिवीत्वेऽपि घटादेर्घटस्याकाशादनन्यस्यैव सतः, आविद्यकमायया भेदव्यवहारः, एवम् एकस्मिन्नेव परमात्मन्यविद्याकल्पितमायाकार्यत्वमेव सर्वेषां कार्यकरणसंघातानां न वस्तुवृत्तेनोपाधिकृतेनोपाधिभेदो वा उपहितजीवभेदो वा विद्यते इति श्लोकानां पिण्डितार्थः ॥ २४ ॥

## ७. प्रमाणप्रमेयव्यवहारः, तर्कश्च

यत्र क्वचित् परब्रह्मणः सकाशादुत्पत्तिः श्रूयते जीवानां तत्र घटाकाशादुत्पत्तिरिव मायिकी सेति कल्पनीयम् इत्युक्तम्। प्रायेण तु परस्यैवाऽऽत्मनो जीवभावेनावस्थानमस्मिन् शरीरे इति वदन्ति श्रुतयः। 'अनेन जीवेनात्मनाऽऽनुप्रविश्य नामरूपे व्याकरवाणि' (छां.६-३-२) 'तत् सृष्ट्वा तदेवानुप्राविशत्' (तै. २-६)–इत्याद्याः सृष्टे कार्यकरणसंघाते जीवभावेनाऽऽत्मनः प्रवेशं ब्रुवत्यः। स्मृतयश्च 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (गी.१३-२), 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्' (गी. १३-२७) इत्येवमाद्याः। देहेन्द्रियादिलक्षणोपाधिभेददर्शनं चापोद्यते बहुशः श्रुतिषु 'अन्योऽसावन्योऽहमस्मीति न स वेद' (बृ. १-४-१०), 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. ४-४-१९) इत्येवम्। अत एवाह भाष्यकारः –

"स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषयसम्यग्दर्शने 'क्षेत्रज्ञः', 'परमात्मा' इति नाममात्रभेदात् क्षेत्रज्ञोऽयं परमात्मनो भिन्नः,

परमात्मायं क्षेत्रज्ञाद् भिन्नः इत्येवंजातीयक आत्मभेदविषयो निर्बन्धो निरर्थकः ''
सू. भा. १-४-२२, पा. १७४

इति ॥

परमात्मनो जीवभावस्तु व्यावहारिकः स्वात्मन्यध्यस्तदेहेन्द्रियादिष्वहंममाभिमानात् । तेनैव चाभिमानेन प्रमातृत्वमात्मनः, प्रत्यक्षादिप्रमाणैः प्रमेयावगतिव्यवहारश्च । तदुक्तं भाष्यकारेण –

"न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति । न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति । न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते । न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्य आत्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति । तस्मात्, अविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि ॥ ''
अध्या. भा. पा. ३

इति । तथा चाविद्यावस्थायामेव जीवस्य प्रत्यक्षादिप्रमाणव्यवहार इति विज्ञायते 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति' (बृ. ४-५-१५) इति ; आत्मैकत्वविज्ञानदशायां तु न प्रमाणप्रमेयव्यवहार इत्यपि विज्ञायते 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत्तत्केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयात्' (बृ. ४-५-१५) इति ॥

यद्यपि नित्यशुद्धबुद्धात्मनोऽविद्याकल्पितं जीवत्वं प्रमातृत्वकृतपरिच्छिन्नज्ञानवत्त्वं च, तदापि तस्य पारमार्थिकं स्वरूपमविकृत-

मनुवर्तत एव । तदेतत् परमार्थात्मतत्त्वावदिधारयिषुणा मन्त्रेणैवोपदिश्यते 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति'' (मुं. ३-१-१) इति । अत्र हि मन्त्रे अहंप्रत्ययविषयत्वेन प्रसिद्धो जीवः कर्ता भोक्ता च 'पुरुष'शब्देन निर्दिश्यते, तत्साक्षी च भोक्तृत्वासंस्पृष्टः, 'ईश'शब्देन इति स्पष्टम् ॥ २५ ॥

अग्नेरिव विस्फुलिङ्गः परमात्मन एवांशोऽपि, अथवा देहेन्द्रियसंघाते प्रविष्टोऽविकृतः परमात्मापि सन्, अविद्यादिव्यवधानात् तिरोहितज्ञानैश्वर्यशक्तिर्भवति जीवो व्यवहारे । तदुक्तं भाष्ये–

"सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगात् । देहेन्द्रियमनोबुद्धिविषयवेदनायोगात् भवति । अस्ति चात्रोपमा यथा अग्नेर्दहनप्रकाशनसंपन्नस्यापि अरणिगतस्य दहनप्रकाशने तिरोहिते भवतः, यथा वा भस्माच्छन्नस्य, एवम् अविद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात्, तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः ॥ "

सू. भा. ३-२-६, पा. ३४७

इति । यदा तु तस्य*स्वरूपज्ञानं भवति, तदा आविर्भूतज्ञानैश्वर्यो भवति । विज्ञायते हि 'यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः'' (मुं. ३-१-२) इति । भाष्यकारोऽप्याह–

''ततो हीश्वराद् हेतोरस्य जीवस्य बन्धमोक्षौ भवतः । ईश्वरस्वरूपापरिज्ञानाद् बन्धः, तत्स्वरूपपरिज्ञानात्तु मोक्षः । तथा च श्रुतिः 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः । तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः ॥ (श्वे. १-११) इत्येवमाद्याः ॥ ''

सू. भा. ३-२-५, पा. ३४७

इति ॥ २६ ॥

एवं च नित्यशुद्धबुद्धमुक्तस्वभावस्यैव सत आत्मनः, अविद्याकल्पितदेहादियोगात् प्रमातृत्वलक्षणं कर्तृत्वभोक्तृत्वलक्षणं च जीवत्वम् ; स्वाभाविकं तु परमात्मत्वम्– इत्यतः 'तत्त्वमसि' इति श्रुत्या परमात्मत्वोपदेशः– इत्यवकल्पते । अविद्यावत्त्वस्य च मिथ्यात्वात् तदध्यारोपावस्थायामपि तस्य परमात्मत्वम् अनुवर्तते यतः । यदाह भाष्यकारः –

" न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति । यथा कश्चित् संतमसे पतितां काञ्चिद् रज्जुम् अहिं मन्यमानो भीतो वेपमानः पलायते, तम् अपरो ब्रूयात् ' मा भैषीः, नायम् अहिः, रज्जुरेव ' इति । स च तदुपश्रुत्या, अहिकृतं भयम् उत्सृजेत्, वेपथुं पलायनं च । न तु अहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद् विशेषः स्यात् । तथैवैतदपि द्रष्टव्यम् ॥ " सू.भा.१-४-६, पा.१५४

इति ॥

अत एव च क्वचित् सूर्यकादिदृष्टान्तेन जीवत्वम् अपारमार्थिकं रूपमात्मनः इति विज्ञाप्यते शास्त्रेषु 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ " (?) इत्यादिषु । भाष्यकारश्चैवमेव भाषते ' आभास एव च ' इति सूत्रार्थं व्याख्यास्यन् –

" आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः । न स एव साक्षात् नापि वस्त्वन्तरम् । .... आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशोपपत्तिः ॥ "

सू. भा. २-३-५०, पा. ३०२

5

इति । अत्र हि जीवत्वस्य परमात्मनि कल्पितस्य तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वमुच्यते तस्य मायिकत्वज्ञापनार्थम् ; जीवस्य पारमार्थिकं तु स्वरूपं नित्यदा ब्रह्मात्मत्वमेवेति च । अत एवान्यत्राऽऽह –

"न हि ईश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः, किं तर्हि संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति । एवं च सत्या अद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता, विपरीतगुणता तु इतरस्य मिथ्या– इति व्यवतिष्ठते ॥" सू. भा. ४-१-३, पा. ४६५

इति ॥ २७ ॥

तदेवम्, कूटस्थचैतन्यैकस्वरूपस्यैव सत आत्मनः प्रत्यक्षादिप्रमाणाश्रितत्वम्, प्रमाणव्यापारयितृत्वलक्षणं च प्रमातृत्वम्, प्रमेयविषये अज्ञत्वम्, प्रमाणैः प्रमेयं परिच्छिद्य तत्तत्त्वावगतिरूपफलभात्त्वं चेति प्रमाणप्रमेयव्यवहारः सर्वोऽपि अविद्यापुरस्सर एवेत्युपपद्यते । अत एव प्रमातृनानात्वम्, प्रमातॄणां विद्वत्त्वाविद्वत्त्वविभागः, प्रमेयसत्यत्वानृतत्वविभागश्चेत्येतत् सर्वमपि व्यावहारिकमेव न परमार्थसत् इत्यपि सिद्धं भवति, अविद्याकृतप्रमातृत्वालम्बनत्वात् सर्वस्यास्य व्यवहारस्य । स्वप्नेऽपि हि परमार्थात्मन्येकस्मिन्नेव प्रमातृनानात्वम्, प्रत्यक्षादिप्रमाणव्यवहारश्च प्राक् प्रबोधात् अनुवर्तते, स्वस्मिन् सत्यत्वबुद्धिं चावहति । न च तावता तस्य परमार्थसत्त्वम् आयातीति । तदाह भाष्यकारः –

"यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्न उच्चावचान् भावान् पश्यतः, निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति प्राक् प्रबोधात्, न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति, तद्वत् ॥"

सू. २-१-१४, पा. १९८

इति ॥ २८ ॥

एवं वेदप्रामाण्यव्यवहारोऽपि यावदविद्याव्यवहारानुवृत्तिस्तावदेव, तस्याप्यविद्याप्रत्युपस्थापितप्रमात्राश्रितत्वात् । विद्यायां तु जातायां नैव शास्त्रम्, न शास्ता, न च शिष्यः – इत्यतो वेदप्रामाण्यव्यवहारस्यापि प्राक् प्रबोधादेवानुवृत्तिरिति युक्तम् । तथा हि भाष्यम् –

“ प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेत् । न । इष्टत्वात् । ‘अत्र पिताऽपिता भवति’ (बृ. ४-३-२२) इत्युपक्रम्य ‘ वेदा अवेदाः ’ (बृ. ४-३-२२) इति वचनात्, इष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे ॥ ” सू. भा. ४-१-३, पा. ४६५

इति ॥ २९ ॥

आत्मविषयकाविद्यानिबन्धनत्वादेव प्रमाणप्रमेयव्यवहारस्य, अविद्या अनुभवमात्रसिद्धा, न तस्यां प्रमाणानां प्रवृत्तिरिति सिध्यति । प्रमाणैर्विषयीकर्तुं योग्येऽपि विषये तावत्, तद्विषया अविद्या प्रमाणप्रवृत्तेः प्रागेव सिद्धा, न पुनः प्रमाणैः सिषाधयिषति तां कश्चिदिति सर्वविदितम् । किं पुनर्वक्तव्यं अविषयभूतब्रह्मात्मविषयाम् अविद्याम् अविद्याप्रत्युपस्थापितानि प्रमाणानि वा न केचिद् विषयीकर्तुं प्रभवेयुरिति । न ह्यविषये ब्रह्मात्मनि कस्यचिदपि प्रमाणस्य प्रवृत्तिः शक्या चिन्तयितुमपि । प्रमातैव तावत् न प्रमाणानां विषयः । यथोक्तं गीताभाष्ये –

“ सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति । न हि पूर्वम् ‘इत्थमहम्’ इत्यात्मानं प्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रवर्तते ॥ ” गी. भा. २-१८, पा. १६

इति । न च प्रमाणानामपि प्रमाणविषयता । न हि स्वयं प्रमेयज्ञापकं सत् प्रमाणं स्वज्ञापने प्रमाणान्तरं समपेक्षत इति युक्तं स्याद् वचः ; न हि दीपस्य स्वप्रकाशने दीपान्तरापेक्षा इति । एवं च सिद्धमिदं प्रमातृप्रमाणप्रमेयविभागाध्यासस्यास्पदभूतः परमार्थात्मा सर्वथा न कस्यचिदपि प्रमाणस्य विषय इति । तदेवं प्रमाणानां प्रमातुश्च प्रमाणप्रकाश्यत्वकाङ्क्षणाभावात्, परमात्मनश्च सर्वसाक्षिणोऽविषयत्वात्, स्वयंप्रकाशकूटस्थचैतन्यस्वरूपत्वेन नित्यसिद्धत्वात्, प्रमातृप्रमाणादिविकल्पास्पदत्वाच्च न प्रमाणविषयता ; अविद्यायाश्च प्रमाणप्रमेयादिविकल्पप्रत्युपस्थापकत्वात्, विचारासहिष्णुस्वभावत्वाच्च न प्रमाणविषयता इति स्थितम् ॥ ३० ॥

यद्यपि चोदनालक्षणस्य वेदस्य अपौरुषेयस्य प्रत्यक्षादिप्रमाणान्तरानवगतसाध्यसाधनसंबन्धज्ञापनसामर्थ्यं अतीन्द्रियदेवतादिज्ञापनसामर्थ्यं च अनतिशङ्कनीयम् इति पूर्वमीमांसकाः, तथापि शब्दलक्षणस्य तस्य न स्वस्याप्यात्मभूते, स्वविषयप्रकाशनसाधनभूतचिदाभाससमर्पके ब्रह्मात्मनि प्रवृत्तिसामर्थ्यं शक्यशङ्कम् । तथा हि श्रुतिः 'श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः । चक्षुषश्चक्षुः' (के. १–२) इति चक्षुरादीनामिव वाग्रूपशब्दप्रमाणस्याप्यात्मभूतं ब्रह्म – इति ज्ञापयति ; 'न तत्र चक्षुर्गच्छति न वाग्गच्छति' (के. १–३) इति च चक्षुरादीनामिव वाचोऽपि तद्विषयीकरणे असामर्थ्यं ब्रवीति । 'यन्मनसा न मनुते' (के. १–६) इति मनसोऽपि तद्विषयीकरणसामर्थ्यं नास्तीति विज्ञापयति । हेतुं च

तस्यात्मनः सर्वप्रमाणाविषयत्वे आचष्टे 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयाः ....' (बृ. ३-४-२) इत्यादिना, 'येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयात्' (बृ. २-४-१४), 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्.... तत्केन कमभिवदेत्' (बृ. ४-५-१५) इति च। व्यवहारे कूटस्थ-चैतन्यरूपेण ब्रह्मणः सर्वावभासकत्वात्, परमार्थतोऽद्वितीयचैतन्य-मात्रत्वाच्च न तस्मिन् प्रमाणव्यापार उपपद्यते – इति श्रुत्यभिप्रायः ॥ ३१ ॥

## ८. ब्रह्मात्मनः शब्दप्रमाणकत्वम्

अथ कथं 'सर्वे वेदा यत्पदमामनन्ति' (का. १-२-१५), 'नावेदविन्मनुते तं बृहन्तम्' (तै.ब्रा. ३-१२-९-७), 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२), 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिन-स्तत्त्वदर्शिनः' (गी. ४-३४) – इति श्रुतिस्मृतिवचनानि? कथं वा गीताभाष्यवचनम् 'शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्' (गी. भा. २-२१) इति? न हि शास्त्रम्, आचार्योक्तिर्वा शब्दत्वाविशेषे स्वसामर्थ्यमतिक्रम्याप्याऽऽत्मतत्त्वं प्रकाशयितुमलं भवेत्। अत्रोच्यते – उक्तमेवेदं प्राक् (पा. ३) 'न हि शास्त्रमिदंतया विषयभूतमात्मतत्त्वं प्रतिपिपादयिषति, किं तु प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति' इति। तदिहाप्यनुसंधेयम्। निर्विशेषे सर्वशब्दप्रत्ययप्रवृत्तिनिमित्तवर्जितेऽ-प्यात्मतत्त्वे देहेन्द्रियाद्यनृतमिथ्योपाधिसंबन्धकृतं प्रमातृत्वम् अध्यारो-

प्यैवोपदिशति शास्त्रम् 'तत्त्वमसि' इति । तत्र 'त्वम्' इति संसारिप्रमातृरूपम् अनूद्य तदपनयनेन 'तत्' असंसारिब्रह्माऽसि इति बोधयद् हि शास्त्रम् आत्मनः प्रमातृत्वमेवापवदति । सोऽयम् **अध्यारोपापवादाख्यो न्यायः** सर्वेषु वेदान्तेषु परमार्थात्मतत्त्वोपदेशार्थं समाद्रियते । तदुक्तं **गीताभाष्ये** –

> "उपाधिकृतं मिथ्यारूपमपि अस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्योच्यते 'सर्वतः पाणिपादम्' इत्यादि । तथा हि संप्रदायविदां वचनम् 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति । सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनिमित्तस्वकार्या इति ज्ञेयसद्भावे लिङ्गानि ज्ञेयस्य इत्युपचारत उच्यन्ते ॥"
>
> गी. भा. १३-१३, पा. २०४

इति । तत्र हीश्वरस्य ज्ञेयत्वमपि अध्यारोप्यते स्वतःसिद्धतत्स्वरूपविज्ञापनार्थम् । अत एवोक्तं परस्तात् –

> "यदि ज्ञेयं चरमेव च स्याद् व्यवहारविषयं सर्वं ज्ञेयम्, किमर्थम् इदमिति सर्वैर्न विज्ञेयम् इति ? उच्यते – सत्यं सर्वाभासं तत्, तथापि व्योमवत् सूक्ष्मम् । अतः सूक्ष्मत्वात् स्वेन रूपेण तज्ज्ञेयमपि अविज्ञेयम् अविदुषाम् । विदुषां तु 'आत्मैवेदं सर्वम्', 'ब्रह्मैवेदं सर्वम्' इत्यादिप्रमाणतो नित्यं विज्ञातम् ॥"
>
> गी. भा. १३-१५, पा. २०५

इति ॥ ३२ ॥

यस्मादेवम् अध्यारोपदृष्ट्या प्रमातृत्वं मिथ्यारूपमात्मधर्मवत् परिकल्प्य तदपवादेन सर्वव्यवहारातीतं परमार्थं ब्रह्म समर्पयति, अत एवेदम् 'अन्त्यं प्रमाणम्' इति परिभाष्यते । न हि तत्त्व-

बोधानन्तरमपि प्रमाणप्रमेयव्यवहारोऽवशिष्यत इति कृत्वा । तदुक्तं भाष्ये –

" अपि च, अन्त्यमिदं प्रमाणम् आत्मैकत्वस्य प्रतिपादकम्, नातःपरं किञ्चिदाकाङ्क्ष्यमस्ति, सर्वात्मैकत्वविषयत्वादवगतेः । सति हि अन्यस्मिन्नवशिष्यमाणेऽर्थे आकाङ्क्षा स्यात्; न त्वात्मैकत्वव्यतिरेकेणावशिष्यमाणोऽर्थोऽस्ति य आकांक्ष्येत ॥ "

सू. भा. २-१-१४, पा. १५९

इति । तथा अन्यत्रापि –

" तस्मात्, 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि । न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति ॥ "

सू. भा. १-१-४, पा. २३

इति ॥ ३३ ॥

अत एवात्र शब्दो न केवलशब्दत्वेन प्रमाणं यथा धर्मजिज्ञासायाम्, किं तर्हि अनुभवानुसारेण तत्त्वं विज्ञापयत्, अनुभवानुसारितर्केण चात्मतत्त्वं विवेचयच्च 'प्रमाणम्' इत्युपचर्यते । तदेतदुक्तं भाष्ये –

" न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किं तु श्रुत्यादयः, अनुभवादयश्च यथासंभवम् इह प्रमाणम्, अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ॥ "

सू. भा. १-१-२, पा. ८

इति ॥

अस्य भाष्यस्यायमभिप्रायः – यद्यदनुभवाधारेण तत्त्वं ज्ञाप्यते स स अनुभवः प्रमाणमत्र । यस्मिंस्तु अन्त्येऽनुभवे अवगत्यपराभिधाने

अद्वैतब्रह्मात्मतत्त्वसमर्पके परिसमाप्यते जिज्ञासा, स प्रमाणफलम् इति परिभाषा। अत्र मीमांसायां यत्र कर्मप्रतिपादनं वा उपासना-प्रतिपादनं वा अदृष्टफलकं प्रकम्यते, तत्र श्रुत्यादय एव प्रमाणम्; यत्र दृष्टानुसारेण प्रमेयतत्त्वाधिगमोपायः प्रतिपाद्यते, तत्र प्रत्यक्षाद-योऽपि प्रमाणम्; यत्र पुनः केवलं साक्षादपरोक्षम् आत्मतत्त्वमेव प्रतिपाद्यते, तत्र प्रत्यक्षादिप्रमाणानामप्यनुग्राहकम् अनुभवमात्रं प्रमाणम् इति 'यथासंभवम्' इति विशेषणादानमिति। तथा हि भाष्यम् –

(१) "कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य॥"

सू. भा. १-१-२, पा. ८

(२) "प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाऽऽशङ्कानुपपत्तिः। कर्मफले हि स्वर्गादौ अनुभवानारूढे स्यादाशङ्का 'भवेद्वा न वा' इति। अनुभवारूढं तु ज्ञानफलम् 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ. ३-४-१) इति श्रुतेः, 'तत्त्वमसि' इति च सिद्धवदुपदेशात्॥"

सू. भा. ३-३-३२, पा. ४०७

(३) "प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ संभवासंभवौ अवधार्येते, न पुनः संभवासंभवपूर्विके प्रमाणप्रवृत्त्यप्रवृत्ती। यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते तत् संभवति; यत्तु न केनचिदपि प्रमाणेनोपलभ्यते, तन्न संभवति। इह तु यथास्वं सर्वैरपि प्रमाणैर्बाह्योऽर्थः उपलभ्यमानः कथं व्यतिरेकाव्यतिरेकादिविकल्पैर्न संभवतीत्युच्येत? उपलब्धेरेव॥"

सू. भा. २-२-२८, पा. २४८

[अत्र बाह्यार्थे प्रत्यक्षादीनामेव प्रामाण्यम्, न केवलतर्कस्य-इत्युक्तम्॥]

एवं तर्कविषयेऽपि 'यथासंभव' विशेषणार्थ ऊह्यः। यत्र लोकदृष्टानुसारेण तर्क्यते, तत्रानुमानम् अनुमानशोधकस्तर्कश्च ग्राह्यः।

यत्र शून्यवाद्यादयः केवलतर्कबलादेव वस्तूनां निःस्वभावत्वम् अभ्यूहन्ति, तत्र केवलतर्क एव प्रबलतरस्तन्निरासाय ग्राह्यः। यत्र पुनरनुभवमात्रानुसारितर्कोऽपेक्ष्यते, तत्र श्रुत्यनुगृहीतस्तदनुसार्येव वा अन्वयव्यतिरेकाख्यो ग्राह्यः। तदप्युक्तं भाष्यकारेण –

(१) यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयति-इत्युक्तम्। नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः संभवति। श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाऽऽश्रीयते। स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनो अनन्वागतत्वम्, संप्रसादे प्रपञ्चपरित्यागेन सदात्मना संपत्तेर्निष्प्रपञ्चसदात्मत्वम्, प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेकः – इत्येवंजातीयकः। 'तर्काप्रतिष्ठानात्' (सू. २-१-११) इति च केवलस्य तर्कस्य विप्रलम्भकत्वं दर्शयिष्यति॥

सू भा. २-१-६, पा.१८८, १८९

इति। प्रथमसूत्रभाष्येऽप्युक्तम् –

(२) तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते॥

सू भा. १-१-१, पा. ६

इति॥ ३४॥

## ९. कर्तृत्वभोक्तृत्वव्यवहारः

एवं तावत्, अविद्याप्रत्युपस्थापितः प्रमाणप्रमेयव्यवहारोऽन्त्येन प्रमाणेन अद्वैतात्मावगमनपूर्वकं यथा बाध्यते तथोपपादितम्।

अथेदानीं कर्तृत्वभोक्तृत्वव्यवहारो निरूप्यते। यथैव नित्यसिद्धावगति-स्वरूपोऽप्यात्मा, अविद्याध्यस्तात्मभावेन देहेन, अध्यस्तात्मीयभावै-र्बुद्धीन्द्रियैश्च प्रमाता सन्, प्रमाणप्रमेयव्यवहारस्याऽऽश्रयो भवति, तथैव नित्यनिर्वृतोऽप्ययम् अध्यस्ताहंभावेन देहेन, अध्यस्तममभावैः कर्मेन्द्रियैश्च कर्ता च सन् क्रियाकारकफलव्यवहारस्याप्याऽऽश्रयो भवति। तदिदमुक्तं सूत्रभाष्ये –

> "अन्योऽन्यस्मिन्नन्योन्यात्मकताम् अन्योन्यधर्मांश्चाध्यस्य इतरेतराविवेकेन, अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्', 'ममेदम्' – इति नैसर्गिकोऽयं लोकव्यवहारः॥" अध्यास भा॰ पा॰ १

इति। 'निसर्गः' इत्यव्युत्पन्नानां स्वभाव उच्यते ॥ ३५ ॥

'व्यवहारः' इति प्रत्ययो, व्यपदेशः, प्रवृत्तिनिवृत्ती चाभिधीयन्ते। तद्यथा लोके कश्चित् स्थाणुं मन्दान्धकारे चोर इति प्रत्येति, व्यपदिशति च, 'चोरोऽयम्' इति 'मामसौ कदाचिद् हन्यात्' इति भीतः पलायते च ततः ; यथा वा कश्चित् शुक्तिकां दूरे स्थितामुपलभ्य मध्याह्ने तच्चाकचक्येन मोहितो 'रजतम्' इति प्रत्येति, व्यपदिशति, तज्जिघृक्षया तत् प्रति धावति च यदा, तदा 'स्थाणुं पुरुष इति व्यवहरत्ययम्'। 'शुक्तिकां रजतमिति व्यवहरत्ययम्' इति वा वदन्ति। स चायं प्रत्ययव्यपदेशादिलक्षणो व्यवहारो भ्रान्तः समीचीनो वा, लौकिको वैदिको वा, सर्वोऽपि जागरितावस्थाविषय एवेत्यतः सा 'व्यवहारावस्था' इति भण्यते। सर्वोऽपि चायं व्यवहारो जागरितावस्थायामनु-

भूयमानयोरात्मानात्मनोरविवेकं पुरस्कृत्यैव भवतीत्यत आह भाष्यकारः –

(१) " तमेतं आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि " अध्यास भा. पा. २

(२) " एवमयम् अनादिरनन्तो नैसर्गिकोऽध्यासः मिथ्याप्रत्यय-रूपः, कर्तृत्वभोक्तृत्वप्रवर्तकः, सर्वलोकप्रत्यक्षः " अध्यास भा. पा. ४

इति च ॥ ३६ ॥

प्रवृत्तिनिवृत्तिरूपोऽपि व्यवहारः प्रमाणप्रमेयव्यवहारवद् व्यवहार-शब्दव्यपदेश्य एव । तत्र तु प्रमाणादिस्वरूपविवेको व्यवहर्तरि नैका-न्तेनापेक्ष्यते । यतः पश्वादिष्वपि तादृशः प्रत्यक्षादिव्यवहार उपलभ्यते । न च ते प्रमाणादिविवेकपूर्वकं प्रवर्तन्ते निवर्तन्ते वा । एवं च यथा लोके अव्युत्पन्नानामिव व्युत्पत्तिमतामपि मिथ्याज्ञानपुरःसरः प्रवृत्ति-निवृत्तिव्यवहारो रागद्वेषप्रयुक्तः, एवं शास्त्रीयेष्वपि व्यवहारेषु वस्तु-स्वरूपविवेकाभावनिबन्धनमिथ्याज्ञाननिमित्त एव प्रवृत्तिनिवृत्तिलक्षणो व्यवहारः–इति श्लिष्यते । अत एव चोक्तं भाष्यकारेणाधस्तादुदाहृत-वाक्ये 'सर्वाणि च शास्त्राण्यध्यासं पुरस्कृत्यैव प्रवृत्तानि' इति ॥ ३७ ॥

तत्र दर्शनान्तराणि लौकिकप्रमेयनिर्धारणायैव प्रवृत्तानीत्यतः तत्तच्छास्त्रप्रणेतॄणामपि प्रवृत्तिर्यथोक्ताध्यासपूर्विकैवेति गम्यते । वेदस्य तु विधिनिषेधलक्षणस्य तावत् यथाप्रसिद्धमेव क्रियाकारकफलसंबन्धा-स्तित्वमुपादाय इष्टानिष्टफलप्राप्तिपरिहारसाधनं विदधतो नाप्रामाण्य-

प्रसक्तिः । मुमुक्षूणामपि उपात्तदुरितक्षयार्थं कर्माणि विधत्ते वेदः, न तु वर्णाश्रमास्तित्वम्, क्रियाकारकफलास्तित्वं वा यथार्थमिति तात्पर्येण वक्ति कुत्रचिदपीति न दोषः । मोक्षपरस्तु वेदः, यद्यपि प्रमात्राद्यविद्याकृतभेदं पुरस्कृत्यैव प्रवर्तते, तथापि न प्रमात्रादिभेदसत्यत्वे तस्य तात्पर्यम् । अध्यारोपापवादन्यायमनुसृत्यैव तत्त्वं विमृश्य विचारान्ते नित्यनिरस्तसमस्ताविद्यातत्कार्ये परमार्थस्वरूपे जिज्ञासुं व्यवस्थापयतीति तु विशेषः ॥ ३८ ॥

तदेवं वेदान्तादन्यत्राधिकारिणः पुरुषस्य तत्तद्दर्शननिर्दिष्टसिद्धान्तसाधनानुशीलनेन तत्तत्फलप्राप्त्यनन्तरमपि कर्तृत्वं भोक्तृत्वं चानुवर्तत एव । सांप्रदायिकविशुद्धवेदान्तदर्शनरीत्या तु ब्रह्मजिज्ञासोर्यद्यपि विज्ञानात् प्रागस्त्येव प्रमातृत्वमध्यारोपदृष्ट्या, ब्रह्मावगतेरूर्ध्वं जिज्ञासोरेव प्रमातृत्वासंस्पृष्टब्रह्मस्वरूपता आविर्भवतीत्यतोऽद्वितीयब्रह्मात्मबोधानन्तरं न कोऽपि व्यवहारोऽवशिष्यते । सर्वस्यापि द्वैतस्य ब्रह्मात्मावगत्या बाधनात् । तदुक्तं संप्रदायविद्भिः –

> “ अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमातृत्वमात्मनः ।
> अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥
> गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् ।
> सद्ब्रह्मात्माऽहमित्येवं बोधे कार्यं कथं भवेत् ॥ ”
>
> सू. भा. १-१-४, पा. ३४

इति । पुत्रभार्यादिषु स्वव्यतिरिक्तत्वेन विज्ञायमानेष्वपि अत्युत्कटस्नेहवशात् अविवेकिनाम् आत्मबुद्धिर्जायेतेति ते गौणात्मानः ;

तत्राऽऽत्मबुद्धिसमसमय एव मुख्ये स्वात्मनि तद्व्यतिरिक्ते आत्मबुद्ध्यनुवर्तनात् । देहाद्यहङ्कारपर्यन्तेषु 'अयमात्मा', 'अयं देहः' इति पुनर्वस्तुभेदप्रसिद्धेर्विविक्तरूपाया अभावात् ते **मिथ्यात्मानः** । शास्त्रोपदेशश्रवणतदर्थमननादिना 'सद्ब्रह्मैवाहम्' इति बोधे जाते, सकलद्वैतबाधपूर्वकम् अद्वैतस्वरूपे ब्रह्मण्येव परममुख्यात्मनि निष्ठां प्राप्तस्य कार्यं कथम् अवशिष्येत ? न हि तदानीं कर्त्रात्मबुद्धिरहमिति, तत्संबद्धे आत्मीयबुद्धिर्वा ममेति वर्तते – इति द्वितीयश्लोकाभिप्रायः ॥ ३९ ॥

## १०. उपास्योपासकविभागव्यवहारः

उपनिषत्सु ज्ञान-विज्ञान-विद्या-शब्दा न केवलं वस्तुतन्त्रं ज्ञानम्, किं तर्हि पुरुषतन्त्रं ध्यानमप्यभिदधति । तथा उपासनशब्दोऽपि न केवलं ध्यानम्, किं तु वस्तुतन्त्रं ज्ञानमप्यभिदधाति क्वचित् क्वचित् । तद्यथा 'स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीत" (बृ. १–४–७) इत्यत्र विद्या, उपासनं च वस्तुतन्त्रं ज्ञानमेवेति प्रकरणादवगम्यते । तथा यत्र 'मनो ब्रह्मेत्युपासीत' (छां. ३–१८–१) इत्युपक्रम्य 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' (छां. ३–१८–६) इत्युपसंहारः क्रियते, तत्र 'उपासीत' इति विधित्सितं कर्तृतन्त्रं ध्यानमेव न तु वस्तुतन्त्रं ज्ञानमिति गम्यते । न ह्यब्रह्मभूते मनसि क्रियमाणा ब्रह्मबुद्धिः, मनस्येव मनोबुद्धिवत्, ब्रह्मणि ब्रह्मबुद्धिवद् वा वस्तुस्वरूपमनुसृत्यैव जायते,

किं तर्हि चोदनाप्रयुक्त एव केवलं पुरुषप्रयत्नेनैव निष्पाद्यते। चोदनावाक्यमपि 'मन' इति मुख्यार्थे मनःशब्दं प्रथमं प्रयुज्य पश्चादेव 'ब्रह्मेत्युपासीत' इति इतिपरं ब्रह्मशब्दम् उच्चारयत् दृष्टिविधानार्थमेव ब्रह्म समर्पयति, मुख्यया वृत्त्या सामानाधिकरण्यासंभवात् इति वस्तुस्वभावपर्यालोचनया अवगम्यते। एवं विज्ञानादिशब्दप्रयोगोऽप्यूह्यः। तत्र मानसत्वाविशेषात्, मानसक्रियारूपाण्युपासनान्यपि अद्वैतब्रह्मविद्याप्रकरणे तत्र तत्र विधीयन्ते। एवं स्थिते, कुत्रोपासनं विधित्सितम्, कुत्र वस्तुतत्त्वप्रतिपादनमेव तु विवक्षितम् – इत्येतन्निर्धारयितुमसमर्थाः **प्राचीनवृत्तिकाराः** केचिदद्वैतिनः सर्वत्र विधिप्रधाना एव वेदान्ता इत्यास्थितवन्तः। केचित्तु यद्यपि ब्रह्म वेदान्तशास्त्रप्रमाणकम्, तथापि ध्याननियोगशेषतयैव तत् प्रतिपाद्यते न स्वप्रधानम् – इति मेनिरे। आधुनिका अपि वेदान्तिनो द्वैतविशिष्टाद्वैतादिवेदान्तप्रस्थानान्तरमवलम्बमानाः सर्वत्र ब्रह्मोपासनमेव विधीयते उपनिषत्सु – इति मन्यन्ते। सांप्रदायिकस्तु सिद्धान्तः **शारीरकभाष्ये** दर्शितः –

(१) "तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्? समन्वयात्। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये अवगम्यमानेऽपि अर्थान्तरकल्पना युक्ता। .... न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः; 'तत्त्वमसि' इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु हेयोपादेयशून्यत्वात् उपदेशानर्थक्यमिति, नैष दोषः, हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः। देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः; न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति, एकत्वे हेयोपादेय-

शून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । यद्यप्यन्यत्र विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथापि आत्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् ॥ ”

सू. भा. १-१-४, पा. ११, १२

(२) “ शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं यद्विषया जिज्ञासा ‘ अथातो धर्मजिज्ञासा ’ इति सूत्रिता, अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वात्, जिज्ञास्यः परिहाराय, तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे । .... एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यम् अनित्यं संसाराख्यम् । .... ‘ अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ’ (छां. ८-१२-१) इति प्रियाप्रियस्पर्शनप्रतिषेधात्, चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्य अशरीरत्वस्य प्रतिषिध्यत इति गम्यते । .... अशरीरत्वमेव धर्मकार्यम् इति चेत्, न, तस्य स्वाभाविकत्वात् । .... अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता, तद् यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात् । .... श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति । .... मोक्षप्रतिबन्धनिवृत्तिमात्रमेवाऽऽत्मज्ञानस्य फलं दर्शयन्ति । .... संपदादिरूपे ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने ‘ तत्त्वमसि ’, ‘ अहं ब्रह्मास्मि ’, ‘ अयमात्मा ब्रह्म ’ इति चैवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत । .... तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येन उपपद्येरन् । अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या ॥ ”

सू. भा. १-१-४, पा. १३-१६

(३) “ यदपि केचिदाहुः – प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्तीति, तन्न, औपनिषदस्य पुरुषस्य अनन्यशेषत्वात् ॥ ” सू. भा. १-१-४, पा. १९

इति ॥ ४० ॥

ध्यानापराभिख्यमुपासनं मानसकर्मत्वात् वैदिककर्मवदेव पुरुषतन्त्रम्, चोदनातन्त्रं च । ज्ञानं तु तद्विलक्षणम् इत्यसकृत् प्रदर्शितं भाष्ये –

(१) " कर्तुमकर्तुम् अन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म ; यथा अश्वेन गच्छति, पद्भ्याम्, अन्यथा वा, न वा गच्छतीति । तथा ' अतिरात्रे षोडशिनं गृह्णाति ', ' नातिरात्रे षोडशिनं गृह्णाति ' ; ' उदिते जुहोति, अनुदिते जुहोति ' इति । विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च । न तु वस्तु ' एवम्, नैवम् ', ' अस्ति, नास्ति ' इति वा विकल्प्यते । विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः । न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्, किं तर्हि, वस्तुतन्त्रमेव तत् ॥ "

सू. भा. १-१-२, पा. ६

(२) " ननु ज्ञानं नाम मानसी क्रिया । न । वैलक्षण्यात्, क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च । यथा ' यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट्करिष्यन्' इति । 'सन्ध्यां मनसा ध्यायेत्' (ऐ.ब्रा. ३-८-१) इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुम्, अकर्तुम् अन्यथा वा कर्तुं शक्यम्, पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथावस्तुभूतवस्तुविषयम् । अतो ज्ञानं कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुम् अशक्यम् । केवलं वस्तुतन्त्रमेव तत्, न चोदनातन्त्रम्, नापि पुरुषतन्त्रम् । तस्मात्, मानसत्वेऽपि ज्ञानस्य महद् वैलक्षण्यम् । यथा च 'पुरुषो वाव गौतमाग्निः', ' योषा वाव गौतमाग्निः ' (छां. ५-७-१, ५-८-१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति । केवलचोदनाजन्यत्वात् क्रियैव सा, पुरुषतन्त्रा च । या तु प्रसिद्धे अग्नौ अग्निबुद्धिः, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा ; किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतत्,

न क्रिया । एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् । तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम् ॥ ”

सू. भा. १-१-४, पा. १८

(३) “ न च प्रमाणान्तरेण अन्यथाप्रसिद्धेऽर्थे अन्यथाज्ञानं नियुक्तस्यापि उपपद्यते । यदि पुनर्नियुक्तोऽहम् इत्यन्यथाज्ञानं कुर्यात्, न तज्ज्ञानम्, किं तर्हि मानसी सा क्रिया । स्वयमेव चेत् अन्यथा उत्पद्येत, भ्रान्तिरेव स्यात् । ज्ञानं तु प्रमाणजन्यं यथाभूतविषयं च । न तन्नियोगशतेनापि कारयितुं शक्यते, न च प्रतिषेधशतेनापि वारयितुं शक्यते । न हि तत् पुरुषतन्त्रम्, वस्तुतन्त्रमेव हि तत् ॥ ”

सू भा. ३-२-२१, पा. ३६३

इति ॥ ४१ ॥

तदेवं कर्मणा समानयोगक्षेमत्वात् उपासनस्य सर्वोऽपि उपास्योपासकादिव्यवहारः क्रियाकारकफलव्यवहारान्तर्भूत एव । तद्वदेव चोपासनातत्त्वमपि यथाशास्त्रमेवावगन्तव्यम् । तथा ह्याह तैत्तिरीयभाष्यकृत् –

(१) “ उपासनं च यथाशास्त्रं तुल्यप्रत्ययसन्ततिरसङ्कीर्णा चातत्प्रत्ययैः, शास्त्रोक्तालम्बनविषया च । प्रसिद्धश्चोपासनशब्दार्थो लोके ‘गुरुमुपास्ते’, ‘राजानमुपास्ते’-इति । यो हि गुर्वादीन् सन्ततमुपचरति स ‘उपास्ते’ इत्युच्यते । स च फलमाप्नोत्युपासनस्य ॥ ”

तै. भा. १-३, पा. २६२, २६३

इति । छान्दोग्यभाष्यकारश्च –

(२) “ सर्वत्र हि शास्त्रप्रापिता एव धर्मा उपास्याः, न विद्यमाना अप्यशास्त्रीयाः ॥ ” छां. भा. २-२-१, पा. ३८८

इति । असति बाधके च यत्र यथोपासितव्यमिति चोद्यते तत्सर्वं

यथार्थमेव शास्त्रसमर्पितत्वादिति प्रतिपत्तव्यम् । यथोक्तं बृहदारण्यक-भाष्ये –

“ भवतु नाम प्राणस्योपासनं न तु विशुद्ध्यादिगुणवत्ता इति । ननु स्यात्, श्रुतत्वात् । न स्यादुपास्यत्वे स्तुत्यर्थत्वोपपत्तेः । न । अविपरीतार्थप्रतिपत्तेः श्रेयःप्राप्त्युपपत्तेः । लोकवत् । यो हि अविपरीत-मर्थं प्रतिपद्यते लोके, स इष्टं प्राप्नोति, अनिष्टाद्वा निवर्तते ; न विपरीतार्थप्रतिपत्त्या । तथा, इहापि श्रौतशब्दजनितार्थप्रतिपत्तौ श्रेयः-प्राप्तिरुपपन्ना न विपर्यये । न चोपासनार्थश्रुतशब्दोत्थविज्ञानविषयस्य अयथार्थत्वे प्रमाणमस्ति । न च तद्विज्ञानस्यापवादः श्रूयते । ततः श्रेयःप्राप्तिदर्शनात् यथार्थतां प्रतिपद्यामहे । विपर्यये चानर्थप्राप्तिदर्श-नात् । यो हि विपर्ययेणार्थं प्रतिपद्यते लोके पुरुषं स्थाणुरिति अमित्रं मित्रमिति वा, सोऽनर्थं प्राप्नुवन् दृश्यते । आत्मेश्वरदेवतादीनामपि अयथार्थानामेव चेत् ग्रहणं श्रुतितः, अनर्थप्राप्त्यर्थं शास्त्रमिति ध्रुवं प्राप्नुयात्, लोकवदेव । न चैतदिष्टम् । तस्मात् यथाभूतानेव आत्मेश्वर-देवतादीन् ग्राहयत्युपासनार्थं शास्त्रम् ॥ ” बृ·भा· १-३-१, पा· ६२५ इति ॥ ४२ ॥

तत्र यथा नित्यम्, नैमित्तिकम्, काम्यम्, प्रायश्चित्तं चेति **कर्म चतुर्विधम्**, एवं उपासनमपि अङ्गावबद्धम्, प्रतीकोपासनम्, अहंग्रहोपासनं चेति त्रिविधम् । तत्र **अङ्गावबद्धोपासनानि** उद्गीथा-दिषु कर्माङ्गेषु आदित्यादिबुद्धिक्षेपरूपाणि ; **प्रतीकोपासनानि** ‘ मनो ब्रह्मेत्युपासीत ’, ‘ आदित्यो ब्रह्मेत्यादेशः ’ – इत्यादिस्थलेषु विहितानि अब्रह्मभूतेषु प्रतीकेषु ब्रह्मदृष्ट्यध्यारोपलक्षणानि ; **अहंग्रहोपासनानि** तु परमेश्वरविषयाणि यत्राहंबुद्ध्या ईश्वरः समुपास्यते ॥

तत्राङ्गावबद्धानि कानिचित् कर्मसमृद्ध्यर्थं भवन्ति । ‘ यदेव

विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति ' (छां. १-१-१०) इति श्रुतेः । कानिचित् पुनर्यथानिर्दिष्टाभ्युदयफलानि भवन्ति । प्रतीकोपासनान्यपि यथोपदेशं दृष्टादृष्टफलप्राप्तये भवन्ति । अहंग्रहोपासनानि तु क्रममुक्तिफलानीति फले विशेषः । यथोक्तम् -

> " अत्र हि कर्मवदुपासनानां भेदाभेदौ संभवतः, कर्मवदेव च उपासनानि दृष्टफलानि, अदृष्टफलानि चोच्यन्ते, क्रममुक्तिफलानि च कानिचित् सम्यग्ज्ञानोत्पत्तिद्वारेण ॥ " सू.भा. ३-३-१, पा. ३७५

इति ॥ ४३ ॥

तत्र द्विरूपं ब्रह्मावगम्यते वेदान्तेषु नामरूपविकारभेदोपाधिविशिष्टमेकम्, यथा 'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः ।' (छां. ३-१४-२) इत्यादिस्थलेषु; निरस्तसमस्तोपाधिसंबन्धं चापरम्, यथा 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' (बृ. २-५-१९), 'अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्' (बृ. ३-८-८) इत्यादिस्थलेषु । तत्र सर्वकारणत्वात् विकारधर्मैरपि कैश्चिद् विशिष्टं ब्रह्म यत्रोपदिश्यते तत्र **उपास्यः परमेश्वरः**, उपासनाकर्ता च जीवः; यत्र तु निरुपाधिकं ब्रह्मोपदिश्यते, तत्र **ज्ञेयं ब्रह्म**, जिज्ञासाकर्ता च जीवः ॥

ज्ञेयमपि ब्रह्माविद्याकल्पितनामरूपोपाधिपरिच्छेदापेक्षया 'सर्वज्ञः', 'सर्वशक्तिः', 'परमेश्वरः' इति व्यवह्रियत एवेत्यवोचाम (खं. ४-१७); न च तावता ब्रह्म सगुणेश्वरत्वं प्रतिपद्यत इति न प्रस्मर्तव्यम् । तत्र तु

सर्वज्ञत्वमीश्वरस्य सर्वविषयावभासनक्षमज्ञानस्वरूपत्वम्, न तु जीवस्येव शरीराद्युपाध्यपेक्षोत्पत्तिमज्ज्ञानवत्त्वम्। यद्यपि जीवो नेश्वराद् भिन्नः, 'नान्योऽतोऽस्ति द्रष्टा' (बृ. ३-७-२३) इत्यादिश्रुतेः, तथापि देहेन्द्रियमनोबुद्धिविषयादियोगात् तस्य परिमितज्ञानत्वम्। एवम् ईश्वरस्य सर्वकर्तृत्वं सर्वशक्तित्वमपि ज्ञेयम्। एकमद्वितीयमपि हि सद् ब्रह्म साधनान्तरमनपेक्ष्यैव सर्वं सृजति। 'स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत' (तै. २-६) इति ज्ञानमयतपोमात्रेण सर्वस्रष्टृत्वश्रवणात्। न च तस्य साधनसामग्र्या पूर्णता संपादयितव्या। 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६-८) इति श्रुतेः। जीवस्य तु परिमितशक्तित्वम्; न हि सर्वक्रियानिर्वर्तन-सामर्थ्यं विद्यते तस्येति ॥ ४४ ॥

तदेवं यद्यपि व्यवहारदृष्ट्या जीवः किञ्चिज्ज्ञः परिमितशक्तिः कर्ता भोक्ता च, तथापि परमार्थतः परमेश्वरादनन्य एव। परमेश्वरस्तु सर्वज्ञः सर्वशक्तिश्च यथोक्तविशेषणाज्जीवाद् व्यतिरिक्तः, सर्वजीव-साक्षित्वेन स्थितत्वात्। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥' (श्वे.६-११) इति श्रुतेः। धर्माधर्मतत्फलकृतातिशयरहितः कूटस्थनित्यचैतन्यस्वरूपश्च; नित्यतृप्तत्वात्, कालत्रयातीतत्वाच्च। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' (का. १-२-१४) इति श्रुतेः। तदनुज्ञयैव च जीवस्यापि कर्तृत्वभोक्तृत्वे। यदाह भाष्यकारः —

(१) " अविद्यावस्थायां कार्यकरणसंघाताविवेकदर्शिनो जीवस्य, अविद्यातिमिरान्धस्य सतः. परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवासात्, साक्षिणश्चेतयितुरीश्वरात् तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः, तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षसिद्धिर्भवितुमर्हति .... तथा हि श्रुतिर्भवति 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' (कौ. ३.८) इति । 'य आत्मनि तिष्ठन् ।[1] .... आत्मानमन्तरो यमयति' (बृ. भा. ३-५-३०) इति चैवञ्जातीयका ॥ "

सू. भा. २-३-४१, पा. २९५, २९६

(२) " नन्वेवम् ईश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्याताम् अकृताभ्यागमश्च जीवस्येति । नेत्युच्यते । .... कृतो यः प्रयत्नो जीवस्य, धर्माधर्मलक्षणः, तदपेक्ष एवैनम् ईश्वरः कारयति । ततश्चैते चोदिता दोषा न प्रसज्यन्ते । जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि विषमं विभजेत् पर्जन्यवदीश्वरो निमित्तत्वमात्रेण ॥ "

सू. भा. २-३-४२, पा. २९६

(३) " सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते । तदेव चेश्वरस्य फलहेतुत्वं यत् स्वकर्मानुरूपाः प्रजाः सृजतीति । विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते ॥ "

सू. भा. ३-२-४१, पा. ३७५

इति ॥ ४५ ॥

## जीवस्य गत्यागती

तत्र प्राणोऽपानो व्यान उदानः समानः – इति च वृत्तिभेदेन पञ्चधा व्यपदिश्यमानो मुख्यप्राणः, शब्दस्पर्शरूप-

---

1. 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः' इति पूर्णं वाक्यम् ॥

रसगन्धलक्षणपञ्चविषयविषयकबुद्धयर्थानि पञ्च **बुद्धीन्द्रियाणि**, वचनादानविहरणोत्सर्गानन्दलक्षणपञ्चकर्मार्थानि पञ्च **कर्मेन्द्रियाणि**, सर्वार्थविषयं त्रैकाल्यवृत्त्यन्तःकरणमेकं मनोबुद्धिरहङ्कारश्चित्तं चेति चतुर्धा वृत्तिभेदेन व्यपदिश्यमानम् – इत्येवम् **एकादशेन्द्रियाणि** – इत्येते द्वादश **प्राणाश्च** परमात्मन एवोत्पन्नाः यावत् संसारं **जीवस्योपाधिभूताः** । 'यथाग्नेर्ज्वलतः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः .... ' (बृ. २–१–२०) इति श्रुतेः । 'पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते । तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च ' (?) इति स्मृतेश्च । तत्र (१) प्राणादिपञ्चकम्, (२) भूतसूक्ष्मपञ्चकम्, (३) बुद्धीन्द्रिय-पञ्चकम्, (४) कर्मेन्द्रियपञ्चकम्, (५) अन्तःकरणचतुष्टयम्, (६) अविद्या, (७) कामः, (८) कर्म च – इति **पुर्यष्टकम्** । एवं स्थिते जीवस्य यथा उपाध्यभिमानादेव कर्तृत्वं भोक्तृत्वं च तथैव जीवो मुख्यप्राणसचिवः, सेन्द्रियः समनस्को विद्या-कर्म-पूर्वप्रज्ञा-परिग्रहः, शरीरारम्भकभूतसूक्ष्मैः सह पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते । 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ' (बृ. ४–४–२) इति श्रुतेः । 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति ' (छां. ५–३–३) इति चाप्प्रधानानामशेषाणां भूतानां ग्रहणमिति **भाष्यकारेण** निर्णीतत्वाच्च –

"बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम् । ... प्राणगतिप्रयुक्ता तदाश्रयभूतानामपामपि भूतान्तरोपसृष्टानां गतिरवगम्यते ॥" सू. भा. ३·१·२, ३, पा. ३२६

इति ॥ ४६ ॥

तत्र कर्मिणाम् इष्टापूर्तदत्तकारिणां **धूमादिमार्गेण पितृयाणापराभिख्येन** गतानां चन्द्रमसं प्राप्य फलभोगान्ते पुनरावृत्तिः । 'तस्मिन् यावत्संपातमुषित्वैकमेवाध्वानं पुनर्निवर्तन्ते' (छां. ५-१०-५) इति श्रुतेः आमुष्मिकफले कर्मजाते उपभुक्ते अवशिष्टैहिकफलेन कर्मजातेन **अनुशयाख्येन** सह प्रत्यावर्तन्ते ; अनुशयानुगुणं च जन्मान्तरं लभन्ते इति विज्ञायते । 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' (छां. ५-१०-७) इति वचनात् ॥ ४७ ॥

पञ्चाग्निविद्याशीलिनां गृहस्थानां हिरण्यगर्भोपासकानां नैष्ठिकब्रह्मचारिणां तथा सगुणब्रह्मोपासकानां च, **अर्चिरादिमार्गेण देवयानापराभिधेन** ब्रह्मलोकं गतानां न पुनरागतिरस्ति इति श्रूयते— 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' (छां. ४-१५-५), 'न च पुनरावर्तते' (छां. ८-१५-१), 'तेषामिह न पुनरावृत्तिरस्ति' (बृ. मा. ६-१-१८) इत्यादिश्रुतिभ्यः । तत्र 'इमं मानवमावर्तम्', 'इह' इति च विशेषणसामर्थ्यात् कल्पान्तरे पुनरावृत्तिरस्तीति गम्यते

इति छान्दोग्य (५-१०-२), बृहदारण्यक (६-२-१५) भाष्ययोर्लिखितं दृश्यते ।

(१) " अतः पञ्चाग्निविदो गृहस्थाः, ये चेमे अरण्ये वानप्रस्थाः परिव्राजकाश्च सह नैष्ठिकब्रह्मचारिभिः श्रद्धातप इत्येवमाद्युपासते श्रद्दधानास्तपस्विनश्च इत्यर्थः । .... ये च सत्यं ब्रह्म हिरण्यगर्भाख्यम् उपासते ते सर्वे अर्चिषम् अचिरमिमानिनीं देवताम् अभिसंभवन्ति प्रतिपद्यन्ते ॥ " छां. भा. ५-१०-२, पा. ४८५

" अत 'इमम्', 'इह' इति च विशेषणार्थवत्त्वाय अन्यत्रावृत्तिः कल्पनीया ॥ " छां. भा. ५-१०-२, पा. ४८४

(२) " ब्रह्मणोऽनेकान् कल्पान् वसन्ति – इत्यर्थः । तेषां ब्रह्मलोकं गतानां नास्ति पुनरावृत्तिरस्मिन् संसारे न पुनरागमनम् 'इह' इति शाखान्तरपाठात् । ...... । तस्मादस्मात् कल्पादूर्ध्वम् आवृत्तिरिति गम्यते ॥ " बृ. भा ६-२-१५, पा. ९९५

शारीरकभाष्ये तु ब्रह्मलोकं गतान् सगुणब्रह्मोपासकान् अमानवः पुरुषो ब्रह्म गमयतीत्यर्थक (छां. ४-१५-५) श्रुत्यभिप्रायचिन्तनप्रसङ्गेन; एवं लिखितं दृश्यते –

(३) " कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तः, तदध्यक्षेण हिरण्यगर्भेण सह, अतःपरं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्त इतीत्थं क्रममुक्तिः, अनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या ॥ " सू. भा. ४-३ १०, पा. ४९६

अतः, येषां ब्रह्मलोके सम्यग्दर्शनप्राप्तिः तेषाम् अपुनरावृत्तिः, येषां तु तदप्राप्तिः, तेषां कालान्तरे पुनरावृत्तिः – इति व्यवस्था कल्पनीयेति भाति । अनुगुणं चात्र गीताभाष्यम् –

(४) " आब्रह्मभुवनात् – भवन्ति अस्मिन् भूतानीति भुवनम्, ब्रह्मभुवनं ब्रह्मलोक इत्यर्थः। आब्रह्मभुवनात् सह ब्रह्मभुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अर्जुन ! मामुपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते ॥ " गी. भा. ८-१६

इति ॥ ४८ ॥

अथ ये नेष्टादिकर्मसेविनः, नाप्युपासकाः, तेषां क्षुद्रजन्मप्राप्तिलक्षणा असकृज्जननमरणप्राप्तिरेव स्यात्, 'अथैतयोः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्' (छां. ५-१०-८) इति श्रुतेः ॥ ४९ ॥

इत्येवं प्रसक्तानुप्रसक्ता जीवानां गत्यागतिचिन्ता कृता । अथेदानीम् उपासनागतामेव चिन्ताम् अनुक्रमिष्यामः । उपासनेषु सर्वेष्वपि प्रत्ययावृत्तिः कर्तव्या, उपासनाशब्देन आवृत्तिगुणाया एव क्रियाया अभिधानात् ; समानप्रत्ययप्रवाहकरणमेव हि उपासनं नाम । 'रश्मींस्त्वं पर्यावर्तयात्' (छां. १-५-२) इति प्रत्ययावृत्तिविधानलिङ्गाच्च । आसीन एव चोपासीत ; तथैव निर्विघ्नानुष्ठानसंभवात् । दिग्देशकालनियमस्तु नास्त्युपासने । विशेषाश्रवणात् । यत्रैवास्य सौकर्येणैकाग्रता तत्रैवोपासीत । इति सामान्यतोऽनुष्ठानप्रकारः ॥

आमरणकालं प्रत्ययावृत्तिः कर्तव्या, कर्मणामिवोपासनानामपि, अन्त्यप्रत्ययवशेनादृष्टफलप्राप्तेः । विविधादृष्टफलदायीन्युपासनानि

यथाकामं विकल्पेन समुच्चित्य वा अनुष्ठीयेरन् ; ईश्वरादिसाक्षात्कार-फलानां तूपासनानामेकमेव आददीत । यथोक्तं भाष्ये –

" एकेन चोपासनेन साक्षात्कृते उपास्ये विषये ईश्वरादौ, द्वितीयम् अनर्थकम् । अपि चासंभवः साक्षात्करणस्य । समुच्चयपक्षे चित्तविक्षेप-हेतुत्वात् । साक्षात्करणसाध्यं च विद्याफलं दर्शयन्ति श्रुतयः 'यस्य स्याद्द्धा न विचिकित्साऽस्ति' (छां. ३-१४-४) इति, 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इति चैवमाद्याः । स्मृतयश्च 'सदा तद्भावभावितः' (गी. ८-६) इति चैवमाद्याः । तस्मात्, अविशिष्ट-फलानां विद्यानाम् अन्यतमम् आदाय तत्परः स्यात्, यावदुपास्यविषय-साक्षात्करणेन तत्फलं प्राप्तम् ॥" सू. भा. ३-३-५९, पा. ४३०

इति ॥

पञ्चाग्निविद्या, वैश्वानरविद्या – इत्येवमादीनां सर्ववेदान्तप्रत्यय-त्वात्, उपासनागुणानां सर्वेषामुपसंहारपूर्वकमेवानुष्ठातव्यम्, न तु केवलम् एकत्रश्रुता एव गुणा उपयोक्तव्याः ॥

तदुक्तं भाष्ये –

" स्थिते चैवं सर्ववेदान्तप्रत्ययत्वे सर्वविज्ञानानाम्, अन्यत्रोदितानां विज्ञानगुणानाम् अन्यत्रापि समाने विज्ञाने उपसंहारो भवति । अर्था-भेदात् । य एव हि तेषां गुणानाम् एकत्रार्थो विशिष्टविज्ञानोपकारकः स एवान्यत्रापि । उभयत्रापि हि तदेवैकं विज्ञानम्, तस्मादुपसंहारः ॥"

सू. भा. ३-३-५, पा. ३७९

इति ॥ ५० ॥

इति सङ्क्षेपेणोपासनातत्त्वं निरूपितम् । अधिकं तु शारीरक-भाष्यादधिगन्तव्यम् । अत्र चाविद्याकल्पितोपाधिसंबन्धेनैवोपास्योपासक-

भेदोपगमात् मध्यमाधिकारिणामुपकारार्थमेवायम् उपासनाव्यवहारः शास्त्रकल्पित इति न प्रस्मर्तव्यम् । यथाहुरभियुक्ताः –

आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।
उपासनोपदिष्टेयं तदर्थमनुकम्पया ॥ गौ. का. ३-१६

इति । सूत्रभाष्यकारोऽप्याह –

"तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः" सू. भा. १-१-१२, पा. ३५

इति । युक्तं चैतत् – न ह्यनध्यस्तात्मभावम् अहङ्कारम्, अनध्यस्तात्मीयभावं च मनोऽनाश्रित्य ध्यातृध्यानध्येयविभागव्यवहारो निर्विभागे परमात्मनि संस्यादिति । अतो वस्तुतन्त्रज्ञानदृष्ट्या वीक्ष्यमाणे आत्मात्मीयभावोऽयमविद्याकल्पित एवेत्यध्यवसीयते । यथोक्तम् उपदेशसाहस्र्याम् –

आत्मा ह्यात्मीय इत्येष भावोऽविद्याप्रकल्पितः ।
आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलम् ॥ उप. १४-१९

अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि ।
अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा ॥ उप. १४-२९

इति ॥ ५१ ॥

## ११. ब्रह्मात्मभावः

अथेदानीं वेदान्तशास्त्रप्रतिपाद्यं परमार्थतत्त्वं निरूप्यते । तत्र वेदत्वाविशेषाद् वेदान्ता अपि सर्वे उपासनादिकर्मविधिपरा एवेति केचिद् वृत्तिकाराः, ध्याननियोगशेषभूतब्रह्मप्रतिपादकाः

इति च केचिदपरे मन्यन्ते स्म । तदेतन्मतद्वयनिराकरणपूर्वकं ब्रह्मात्मवस्त्वेव प्रमाणान्तरागोचरं स्वतन्त्रं वेदान्तप्रतिपाद्यमिति स्वसंप्रदायसिद्धान्ताविष्करणं क्रियते सूत्रभाष्यकारेण इत्यवोचाम (खं. १०–४०, पा. ४६) । उक्तं च भाष्यकारेण स्वयं कण्ठरवेण ईक्षत्यधिकरणावतरणिकायाम् –

> "एवं तावद् वेदान्तवाक्यानां ब्रह्मात्मावगतिप्रयोजनानां ब्रह्मात्मनि तात्पर्येण समन्वितानां अन्तरेणापि कार्यानुप्रवेशं ब्रह्मणि पर्यवसानमुक्तम् । ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिनाशकारणम् इत्युक्तम् ॥" सू. भा. १–१–५, पा. २४

इति ॥

तत्रेदमिदानीं चिन्त्यते । द्वयी हि वेदान्तवाक्यानां प्रवृत्तिः । क्वचिद् ब्रह्मवस्तुमात्रनिर्देशनाय, क्वचिदुपासनाविधानायेति । एवं स्थिते कस्मात् कारणात् वस्तुनिर्देशकवाक्यानामेव ब्रह्मस्वरूपसमर्पकत्वमास्थीयते, न पुनरुपासनावाक्यानाम् ? किमिति वस्तुनिर्देशकवाक्यानाम् उपासनाविध्यपेक्षितोपास्यस्वरूपसमर्पकत्वं निराक्रियते, संभवत्यपि सर्वेषां वाक्यानाम् उपासनापरत्वस्वीकारेणैकवाक्यत्वे ? उपास्यस्वरूपस्यैव यथावर्णितस्य पारमार्थिकत्वस्वीकारे ननु भेदश्रुतीनां निरवकाशत्वमपि वारितं स्यात्, भेदज्ञापकप्रत्यक्षादिविरोधोऽपि परिहृतः । एवं जगज्जन्मादिकारणवाक्यानां स्पष्टमेव सर्वज्ञसर्वशक्तिमद्ब्रह्मसमर्पकाणां मायिककारणप्रतिपादकत्वमङ्गीकृत्य विशेषप्रतिषेधश्रुतीनामेव प्राधान्यं किमित्यास्थीयते, न पुनर्वैपरीत्येन जगत्कारणसर्वज्ञेश्वरवादिनीनामेव वाक्यानां यथाश्रुतार्थत्वं स्वीकृत्य प्रतिषेधश्रुतीनामेव धर्मविशेषमात्र-

निराकरणपरत्वेन सङ्कोचनम् ? तथा हि प्रत्यक्षादिप्रमाणान्तर-विरोधोऽपि वारितः स्यादिति ॥

अत्रैवमुक्तं समाधानं भाष्यकारेण –

(१) "प्रत्युपाधिभेदं हि अभेदमेव ब्रह्मणः श्रावयति शास्त्रम् 'यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा' (बृ. २-५-१) इत्यादि । अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुम् । भेदस्योपासनार्थत्वात्, अभेदे तात्पर्यात् ॥" सू. भा. ३-२-१२, पा. ३५६

(२) "रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यम्, न रूपादिमत् । कस्मात् ? तत्प्रधानत्वात् । 'अस्थूलमनण्वह्रस्वमदीर्घम्' .... 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' इत्येवमादीनि वाक्यानि ब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानि – इत्येतत् प्रतिष्ठापितं 'तत्तु समन्वयात्' (सू. १-१-४) इत्यत्र । तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यम् । इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि । उपासनाविधिप्रधानानि हि तानि । तेषु असति विरोधे यथाश्रुतम् आश्रयितव्यम्, सति तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति – इत्येष विनिगमनायां हेतुः, येनोभयीष्वपि श्रुतिषु सतीषु, अनाकारमेव ब्रह्मावधार्यते, न पुनर्विपरीतम् ॥" सू. भा. ३-२-१४, पा. ३५७

(३) "जगदुत्पत्तिस्थितिप्रलयश्रुतेरनेकशक्तित्वं ब्रह्मणः इति चेत्, न । विशेषनिराकरणश्रुतीनां अनन्यार्थत्वात् । उत्पत्त्यादिश्रुतीनामपि समानम् अनन्यार्थत्वम् इति चेत् । न । तासामेकत्वप्रतिपादनपरत्वात् । मृदादिदृष्टान्तैः सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयच्छास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति । कस्मात् पुनः, उत्पत्त्यादिश्रुतीनां

विशेषनिराकरणश्रुतिशेषत्वम्, न पुनरितरशेषत्वम् इतरासाम् इति ? उच्यते । विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वात् । न ह्यात्मन एकत्वनित्यत्वाद्यवगतौ सत्यां भूयः काचिदाकांक्षा उपजायते ; पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः'.... इत्यादिश्रुतिभ्यः । तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात् । विकारानृताभिसन्धापवादाच्च 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति । अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगन्तुं शक्यते । नैवम् उत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति । प्रत्यक्षं तु तासामन्यार्थत्वम् समनुगम्यते । तथा हि 'तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यति' (छां. ६-८-३) इत्युपन्यस्य, उदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति ; 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति' (तै. ३-१-१) इति च । एवम् उत्पत्त्यादिश्रुतीनाम् ऐकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मणः ॥"

सू. भा. ४-३-१४, पा. ४९८, ४९९

इति ॥ ५२ ॥

निष्प्रपञ्चमेकरूपमेव ब्रह्म न तस्य सप्रपञ्चत्वं कथमपि संभवति । वस्तुस्वभावस्यानपायात् । तत्र सविशेषता तु अविद्याकल्पितमायावशात् इति सिद्धान्तः । अत एव यत् क्वचिदुपासनार्थं ब्रह्मणो रूपवत्त्वं विविधगुणवत्त्वादिकं वा उपवर्ण्यते, यश्च स्वेच्छया देहस्वीकारः श्रूयते, मनुष्यलोके च रामकृष्णादिरूपेण जन्म लोकानुग्रहार्थं कर्म च स्मर्यते, सर्वं तत् मायाव्यपाश्रयादेवेत्यवगन्तव्यम् । यदाह भाष्यकृत्—

(१) "यत्तूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यत इति, अत्र ब्रूमः । स्यात् परमेश्वरस्यापि इच्छावशान्मायामयं रूपं साधकानुग्रहार्थम् । 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।

सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि ’ (मो. ध. ३३९-४५) इति स्मरणात् ॥ ” सू. भा. १-१-२०, पा ४५

(२) “ अपि च यत्र तु निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते, भवति तत्र शास्त्रम् ‘ अशब्दमस्पर्शमरूपमव्ययम् ’ (का. १-३-१५) इत्यादि ; सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद् विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते ‘सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः’ (छां. ३-१४-२) इत्यादिना ॥ ” सू. भा. १-१-२०, पा. ४५

(३) “ स्वमहिमप्रतिष्ठस्यापि आधारविशेषोपदेश उपासनार्थो भविष्यति । सर्वगतत्वात् ब्रह्मणो व्योमवत् सर्वान्तरत्वोपपत्तेः ॥ ”
सू. भा. १-१-२०, पा. ४५

(४) यत्तूक्तं ‘मनोमयः प्राणशरीरः’ इति जीवलिङ्गम् , न तद्ब्रह्मण उपपद्यत इति, तदपि ब्रह्मण्युपपद्यत इति ब्रूमः । सर्वात्मत्वाद्धि ब्रह्मणो जीवसंबन्धीनि मनोमयत्वादीनि ब्रह्मसंबन्धीनि भवन्ति । तथा च ब्रह्मविषये श्रुतिस्मृती भवतः ‘ त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी । त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः ॥ ’ (श्वे. ४-३) इति । ‘ सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ ’ (गी. १३-१३) इति च ॥ ”
सू. भा. १-२-२, पा. ६५

“ अप्राणो ह्यमनाः शुभ्रः – इति श्रुतिः शुद्धब्रह्मविषया, इयं तु ‘ मनोमयः प्राणशरीरः ’ इति सगुणब्रह्मविषया – इति विशेषः ॥ ”
सू. भा. १-२-२, पा. ६५

(५) एवं मिथ्याभिमानेक्षणवतां तद् ह किल एषां मिथ्येक्षणं विजज्ञौ विज्ञातवत् ब्रह्म ; सर्वेक्षितृ हि तत् सर्वभूतकरणप्रयोक्तृत्वात् । तद् देवानां च मिथ्याज्ञानम् उपलभ्य मैवासुरवद् देवा मिथ्याभिमानात् पराभवेयुः – इति तदनुकम्पया देवान् मिथ्याभिमानापनोदनेन अनुगृह्णीयाम् इति तेभ्यो देवेभ्यो ह किल अर्थाय प्रादुर्बभूव ; स्वयोग-

माहात्म्यनिर्मितेन अत्यद्भुतेन विस्मापनीयेन रूपेण देवानामिन्द्रियगोचरे प्रादुर्बभूव ॥ के. ३-२, पा. ३०, ३१

(६ अ) " अजोऽपि जन्मरहितोऽपि सन्, तथा अव्ययात्मा अक्षीणज्ञानशक्तिस्वभावोऽपि सन्, तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानाम् ईश्वरः ईशनशीलोऽपि सन्, प्रकृतिं स्वां मम वैष्णवीं मायां त्रिगुणात्मिकां यस्या वशे सर्वं जगद् वर्तते, यया मोहितं सत् स्वमात्मानं वासुदेवं न जनाति, तां प्रकृतिं – स्वाम् अधिष्ठाय वशीकृत्य संभवामि, देहवानिव भवामि जात इव च आत्ममायया; न परमार्थतो लोकवत् ॥"
गी. भा. ४-६, पा. ६२

(आ) " जन्म मायारूपम्, कर्म च साधुपरित्राणादि मे मम दिव्यम् अप्राकृतम् ऐश्वरम् एवं यथोक्तं यो वेत्ति तत्त्वतः तत्त्वेन यथावत् त्यक्त्वा देहमिमं पुनर्जन्म पुनरुत्पत्तिं नैति न प्राप्नोति माम् एति आगच्छति सः, मुच्यते, हे अर्जुन ! ॥ " गी.भा. ४-९, पा. ६३

इति ॥ ५३ ॥

## १२. ब्रह्मात्मानुभवसाधनम्, एकदेशिमतेन

निष्प्रपञ्चब्रह्मात्मैवाहम् इत्यनुभवो वेदान्तवाक्यार्थसमालोचनादेव निष्पाद्यते, न तु प्रमाणान्तरेण । वाक्यार्थज्ञाननिष्पत्त्यनन्तरं तु न किञ्चिदवशिष्यते अनुभवनिष्पादनार्थम् इत्येष वेदान्तसिद्धान्तो भगवत्पादीयसंप्रदायागतः । उपासनादिकृत्यं त्वविद्याक्षेत्रे एव ; तत्र क्रियाकारकफलभेदस्य लब्धावकाशत्वात्

(१) " वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता ॥ " सू. भा. १-१-२, पा. ७

(२) "अपि च यदा तत्त्वमसीत्येवंजातीयकेन अभेदनिर्देशेन अभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वम् ॥" सू. भा. २-१-२२, पा. २०९

इति ॥

(३) "तत्राविद्यावस्थायां ब्रह्मणः उपास्योपासकादिलक्षणः सर्वो व्यवहारः ॥" सू. भा. १-१-१२, पा. ३५

(४) "अपि चान्त्यमिदं प्रमाणम् आत्मैकत्वस्य प्रतिपादकम्। नातःपरं किञ्चिदाकांक्ष्यमस्ति। यथा हि लोके 'यजेत' इत्युक्ते 'किम्? केन? कथम्?' इत्याकांक्ष्यते, नैवं 'तत्त्वमसि', 'अहं ब्रह्मास्मि' - इत्युक्ते किञ्चिदाकांक्ष्यमस्ति, सर्वात्मैकत्वविषयत्वादवगतेः ॥"

सू. भा. २-१-१४, पा. १९९

इति च ॥ ५४ ॥

अथ च केचिद् वृत्तिकाराः मन्यन्ते स्म ब्रह्मात्मानुभवार्थं मुमुक्षुः प्रपञ्चप्रविलये नियुज्यते इति। ध्याननियोगवादिनामिव तेषामपि मतं न वेदान्तसम्मतमिति भाष्यकारः प्रतिपादयति -

(१) यदप्याहुः - आकारवादिन्योऽपि श्रुतयः प्रपञ्चप्रविलयमुखेन अनाकारप्रतिपत्त्यर्था एव, न पृथगर्था इति, तदपि न समीचीनमिव लक्ष्यते। कथम्? ये हि परविद्याधिकारे केचित् प्रपञ्चा उच्यन्ते यथा 'युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च' (बृ. २-५-१९) इत्येवमादयः, ते भवन्ति प्रविलयार्थाः 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' (बृ. २-५-१९) इत्युपसंहारात्। ये पुनरुपासनाधिकारे प्रपञ्चा उच्यन्ते यथा 'मनोमयः प्राणशरीरो भारूपः' (छां. ३-१४-२) इत्येवमादयः, न तेषां प्रविलयार्थत्वं न्याय्यम्। 'स क्रतुं कुर्वीत' (छां. ३-१४-१) इत्येवञ्जातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबन्धात्। श्रुत्या

चैवञ्जातीयकानां गुणानाम् उपासनार्थत्वे अवकल्पमाने न लक्षणया प्रविलापनार्थत्वम् अवकल्पते । सर्वेषां च साधारणे प्रविलयार्थत्वे सति 'अरूपवदेव हि तत्प्रधानत्वात्' (सू. ३-२-१४) इति विनिगमनकारणवचनम् अनवकाशं स्यात् । फलमप्येषां वाक्यानां यथोपदेशं क्वचिद्दुरितक्षयः, क्वचिदैश्वर्यप्राप्तिः, क्वचित् क्रममुक्तिः – इत्यवगम्यत एवेत्यतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वम् ॥" सू. भा. ३-२-२१, पा. ३६१

इति ॥

अधुनापि केचिद्वेदान्तिनः प्रपञ्चविलयं कृत्वैव निष्प्रपञ्चात्मानुभवः प्राप्तव्य इति वदन्ति । नियोगवादिनो भवन्तु नो वा भेदप्रविलयवादिनः, तेषां मते समान एवैष दोष इत्यादर्शयितुं भगवत्पादीयोऽयं विमर्शः समुदाह्रियते –

(२) "यदि तावद् विद्यमानोऽयं प्रपञ्चो देहादिलक्षण: आध्यात्मिकः, बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत, स पुरुषमात्रेणाशक्यः प्रविलापयितुम् इति तत्प्रविलयोपदेशोऽशक्यविषय एव स्यात् । एकेन चादिमुक्तेन पृथिव्यादिप्रविलयः कृत इति, इदानीं पृथिव्यादिशून्यं जगदभविष्यत् । अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन् अयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात्, ततो ब्रह्मैवाविद्याध्यस्तप्रपञ्चप्रत्याख्यानेन आवेदयितव्यम् 'एकमेवाद्वितीयं ब्रह्म, तत्सत्यम् स आत्मा तत्त्वमसि' इति । तस्मिन्नावेदिते विद्या स्वयमेवोत्पद्यते, तया चाविद्या बाध्यते, ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत् प्रविलीयते । अनावेदिते तु ब्रह्मणि 'ब्रह्मविज्ञानं कुरु, प्रपञ्चप्रविलयं च' इति शतकृत्वोऽप्युक्ते न ब्रह्म विज्ञानम्, प्रपञ्चप्रविलयो वा जायते ॥" सू. भा. ३-२-२१, पा. ३६२.

अत्र 'तत्त्वमसि' इति वाक्येनैव विज्ञानं जायते, प्रपञ्चबाधश्च सेत्स्यतीत्युक्तं स्वसंप्रदायानुसारेण, अन्यथा प्रपञ्चविलयो नैव शक्यकरण इति च ॥

'वाक्येनावेदिते ब्रह्मणि तत एवाविद्याध्यस्तप्रपञ्चः प्रविलीयते' इत्यनेन श्रुत्या आचार्येण वा सकृदेवोपदेष्टव्यम् इति वा, मिथ्याबुद्ध्यध्यारोपितप्रपञ्चस्य प्रविलापने क्रमो वेदान्ते नाश्रीयत एवेति वा, नाभिप्रेतम् । यावता तत्त्वमसिवाक्यमेव हि तावद् भूयो भूय उपदिष्टः पित्रा श्वेतकेतोस्तत्तदाशङ्कानिवारणार्थम् । अविद्याध्यारोपितस्य कार्यकारणभावसामान्यविशेषभावान्नमयाद्यात्मबुद्ध्यवस्थात्रयवत्त्वादिप्रपञ्चस्य विद्यया प्रविलापनार्थमेव हि वेदान्तप्रवृत्तिः – इत्युदर्के दर्शयिष्यामः । विद्यमानस्यैव तु कस्यचित् प्रपञ्चस्य प्रविलयो भावनादिप्रयत्नबलान्निष्पाद्य इत्येतन्मात्रं त्विह निरस्तम् यथोक्तवादस्य श्रुतियुक्त्यनुभवबाह्यत्वात् इति बोद्धव्यम् ॥

(३) "नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः, प्रपञ्च(प्र)विलयविषयो वा नियोगः स्यात् । न । निष्प्रपञ्चब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः । रज्जुस्वरूपप्रकाशनेनैव हि तत्स्वरूपविज्ञानम्, अविद्याध्यस्तसर्पादिप्रपञ्चप्रविलयश्च भवति । न च कृतमेव क्रियते ॥"

सू. भा. ३-२-२१, पा. ३६२

अत्र वाक्योपदेशेनैव ब्रह्मात्मावगतिः, अविद्याया आत्यन्तिकबाधश्च सिध्यतीति स्वमतम् उपपादितम् ॥

(४) "नियोज्योऽपि च प्रपञ्चावस्थायां योऽवगम्यते, जीवो नाम, स प्रपञ्चपक्षस्यैव वा स्यात्, ब्रह्मपक्षस्यैव वा ? प्रथमे विकल्पे

निष्प्रपञ्चब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात्, कस्य प्रपञ्च(प्र)विलये नियोग उच्येत ? कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्येत ? द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपम्, जीवत्वं तु अविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि, नियोज्याभावान्नियोगाभाव एव ॥ सू. भा. ३-२-२१, पा. ३६२

अत्र ब्रह्मैकमेव परमार्थः, तस्मिन्नेव जीवत्वमविद्याकल्पितम्, कल्पितरूपनिरसनेनैव ब्रह्मात्मत्वं विज्ञेयम्—इति सिद्धान्तरहस्यमुद्घाटितमिति स्पष्टम् ॥ ५५ ॥

अविद्याकल्पितजीवत्वनिरसनेनैव स्वाभाविकं ब्रह्मात्मत्वं तत्त्वमस्यादिवचनैरावेद्यत इति स्थितम् अधस्तात्तनविचारसंदर्भेण । अत एवेदं सिद्धान्तरहस्यं भूयो भूयस्तत्र तत्र स्मर्यते भाष्ये । तद्यथा –

(१) "तस्मात्, यदविद्याप्रत्युपस्थापितम् अपारमार्थिकं जैवं रूपम्, कर्तृभोक्तृरागद्वेषादिदोषकलुषितम् अनेकानर्थयोगि, तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते सर्पादिविलयनेनेव रज्ज्वादि ॥ सू. भा. १-३-१९, पा. ११५

(२) " सूत्रकारस्य अत्रायमभिप्रायः– नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये, एकस्मिन्, असङ्गे, परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम् । तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैः, द्वैतवादप्रतिषेधैश्चापनेष्यामीति परमात्मनो जीवादन्यत्वं द्रढयति ; जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं तु अनुवदत्येव लोकप्रसिद्धं जीवभेदम् ॥ सू. भा. १-३-१९, पा. ११५

(३) स्वयंप्रसिद्धं ह्येतत् शारीरस्य ब्रह्मात्मत्वम् उपदिश्यते, न यत्नान्तरप्रसाध्यम् । अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वम् अवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते रज्ज्वादिबुद्ध्य इव सर्पादिबुद्धीनाम् ॥ सू. भा. २-१-१४, पा. १९७

एवमन्यत्रापि जीवभावविलयनेन ब्रह्मात्मभावबोधनवचनानि द्रष्टव्यानि ॥ ५६ ॥

तदेवं ब्रह्मात्मत्वं जीवस्य पारमार्थिकं स्वरूपमेव सद् विज्ञाप्यते तत्त्वमस्यादिश्रुतिभिरिति स्थिते **प्राचीनैर्वृत्तिकारैः** स्वस्वसंप्रदायमवलम्बमानैः प्रयत्नसाध्यमेवैतत् सर्वव्यवहारातीतं ब्रह्मात्मैक्यदर्शनम्, न केवलवाक्यश्रवणमात्रलभ्यम् इति निर्बन्ध आस्थितः । तेषां तत्र तत्र भाष्ये निरासः कृतः स्वसिद्धान्तनैर्मल्याविष्करणप्रसङ्गेन । तद्यथा –

(१) "बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति। ... दर्शयति च 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना ब्रह्मात्मत्वदर्शनं प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्याभावम् । न चायं व्यवहाराभावोऽवस्थाविशेषनिबन्धोऽभिधीयत इति युक्तं वक्तुम्, 'तत्त्वमसि' इति ब्रह्मात्मभावस्यानवस्थाविशेषनिबन्धनत्वात् ।।"

सू. भा. २-१-१४, पा. १९७, १९८

अनेन समाध्यवस्थायामेवाद्वैतदर्शनम्, व्युत्थाने तु द्वैतव्यवहारः – इति वदतां व्याख्यानप्रस्थानीयानां मतं निरस्तं भवति ॥

(अ) "सकृच्छ्रुतौ च ब्रह्मात्मत्वप्रतीत्यनुपपत्तेः, आवृत्त्यभ्युपगमः इति चेत् । न । आवृत्तावपि तदनुपपत्तेः । यदि हि 'तत्त्वमसि' इत्येवंजातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्, ततस्तदेवावर्त्यमानम् उत्पादयिष्यतीति का प्रत्याशा स्यात् ?"

सू. भा. ४-१-२, पा. ४६१

(आ) "अथोच्येत, न केवलं वाक्यं कञ्चिदर्थं साक्षात्कर्तुं शक्नोति, अतो युक्त्यपेक्षं वाक्यम् अनुभावयिष्यति ब्रह्मात्मत्वम् इति, तथापि आवृत्त्यानर्थक्यमेव । सापि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति ॥"

सू. भा. ४-१-२, पा. ४६१

अत्र वाक्यजन्यं ज्ञानं जातमात्रं नाज्ञानं निःशेषं निवर्त्य ब्रह्मात्मत्वानुभवं जनयति, अभ्यस्यमानं तु तदेव निःशेषाज्ञाननिवर्तन-क्षमं भवेदिति वदताम्, शास्त्रजन्यं ज्ञानं युक्तिसहितमेवासकृ-दभ्यस्तं ब्रह्मात्मत्वानुभावं जनयतीति वदतां च **प्रसंख्यानवादिनां** मतं शङ्कावादिमुखेन निरस्तम् । तत्र प्रथमं मतं **नैष्कर्म्यसिद्धौ** प्रथमाध्याये (१-६७) परामृष्टम्, द्वितीयं च तृतीये (३-९०, ९१) निरस्तम् । **उपदेशसाहस्र्यां** नैष्कर्म्यसिद्ध्या प्रमाणत्वेनाश्रितायां सविस्तरम् अनूद्य निरस्तोऽयं प्रसंख्यानवादः । ततः कतिपयश्लोका-नुद्धृत्य इहोदाहरिष्यामः-

"सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोऽपि यो भवेत् ।
अपेक्षतेऽत एवान्यदवोचाम द्वयं हि तत् ॥
नियोगोऽप्रतिपन्नत्वात् कर्मणां स यथा भवेत् ।
अविरुद्धो भवेत्तावद्यावत्संवेद्यताऽदृढा ॥
चेष्टितं च तथा मिथ्या स्वच्छन्दः प्रतिपद्यते ।
प्रसङ्ख्यानमतः कार्यं यावदात्माऽनुभूयते ॥
सदस्मीति च विज्ञानमक्षजो बाधते ध्रुवम् ।
शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः ॥
श्रुतानुमानजन्मानौ सामान्यविषयौ यतः ।
प्रत्ययावक्षजोऽवश्यं विशेषार्थो निवारयेत् ॥

उप० १८-१० प्रभृति १४ पर्यन्तम्

अत्रान्तिमश्लोकोत्थापिता शङ्का - शास्त्रयुक्तिभ्यां सामान्यमेव ज्ञानं जायते न विशेषार्थसमर्पक इत्येषा - सूत्रभाष्येऽप्युद्राव्य निराकृतैव शङ्कावादिना -

" अथापि स्यात्, युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयम्। यथा 'अस्ति मे हृदये शूलम्' इत्यतो वाक्यात्, गात्रकम्पादिलिङ्गाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति यथा स एव शूली। विशेषानुभवश्चाविद्याया निवर्तकः; अतस्तदर्था आवृत्तिः - इति चेत्। न। असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसम्भवात्। न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्याम् अनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्याम् अवगन्तुं शक्यते। तस्मात्, यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्यते यदि वा सामान्यमेव, उभयथापि सकृत्प्रवृत्ते ते स्वकार्यं कुरुतः इत्यावृत्त्यनुपयोगः॥ "

सू. भा. ४-१-२, पा. ४६१

इति॥ ५७॥

तदेवं प्रपञ्चप्रविलयनियोगवादः, प्रसङ्ख्याननियोगवादश्च - इत्येतौ ध्याननियोगवादवदेव श्रुत्यक्षरबाह्यौ इति स्पष्टीकृतं भाष्ये। एतेनैव प्राचीनवेदान्तिनाम्- सर्वे कार्यविधिवादाः प्रत्युक्ता वेदितव्याः। अत्र सर्वत्रापि सिद्धान्तयुक्तयः समन्वयाधिकरणभाष्योदाहृताः संक्षेपेणोदाह्रियन्ते सिद्धान्तरहस्यबुभुत्सूनां कृते -

(१) ब्रह्मात्मभावः शास्त्रव्यतिरिक्तप्रमाणाविषयः।

(२) शास्त्रोपदेशाद् ब्रह्मात्मताऽवगमादेव पुरुषार्थः।

(३) वस्तुमात्रकथनेऽपि संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं वाक्यस्य।

(४) अवगतब्रह्मात्मभावस्य पुरुषस्य न यथापूर्वं संसारित्वम्।

(५) ब्रह्मात्मत्वज्ञानं न क्रियारूपम्। यावता तत्त्वमसीत्यादिवाक्यस्थ पदसमन्वयो ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः।

(६) ब्रह्मणोऽविषयत्वादेव, न तत्र क्रियानुप्रवेशः शक्यकल्पनः।

(७) उत्पाद्यादिचतुर्विधद्रव्यविलक्षणं ब्रह्म, ब्रह्मस्वभाव एव च मोक्षः।

(८) ब्रह्मविद्यानन्तरमेव मोक्षः, यस्मात् अविद्यामात्रप्रतिबद्धः सः ।
(९) ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च प्रमाणानि ॥

यथोपवर्णितमेव ब्रह्मात्मावगतिरूपं ज्ञानमूरीकृत्य तदनुगतमेव सिद्धान्ते ज्ञानसाधनविचारः क्रियत इति बोध्यम् ॥ ५८ ॥

## १३. ब्रह्मात्मानुभवसाधनम्, सिद्धान्तरीत्या

अथ सिद्धान्तरीत्या ब्रह्मविद्यासाधनचिन्ता प्रतीयते । तत्र यज्ञदानतपांसि परम्परया विद्योत्पत्तिसाधनानि । सा च विद्योत्पत्तिः सत्त्वशुद्धिद्वारा – इति श्रुतिस्मृतिभ्यामवगम्यते । तथा हि सूत्रम् 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत' (सू. ३–४–२६) इति । भाष्यं च तत्र –

"अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि नात्यन्तमनपेक्षैव । ननु विरुद्धमिदं वचनम्, अपेक्षते चाश्रमकर्माणि विद्या नापेक्षते चेति नेति ब्रूमः । उत्पन्ना हि विद्या फलसिद्धिं प्रति न किञ्चिदन्यदपेक्षते, उत्पत्तिं प्रति त्वपेक्षते । कुतः ? यज्ञादिश्रुतेः । तथा हि श्रुतिः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ ४–४–२२) इति यज्ञादीनां विद्यासाधनभावं दर्शयति । विविदिषासंयोगाच्चैषामुत्पत्तिसाधनभावोऽवसीयते । स्मृतिरपि 'कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते ॥' (मो·ध·२७०·३८) इत्येवमाद्या । 'अश्ववत्' इति योग्यता निदर्शनम् । यथा च योग्यतावशेन अश्वो न लाङ्गलकर्षणे युज्यते, रथचर्यायां तु युज्यते, एवं आश्रमकर्माणि विद्याया फलसिद्धौ नापेक्षन्ते उत्पत्तौ चापेक्षन्त इति ॥" सू· भा· ३–४–२६, पा· ४४५

इति ॥ ५९ ॥

शमदमोपरतितितिक्षाश्रद्धासमाधानानि **अन्तरङ्गसाधनानि** विद्यायाः । 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इति हि तेषां विद्यासाधनत्वं श्रूयते । **माध्यन्दिनपाठे** स्थितायाः श्रद्धाया अपि अत्रोपसंहारं कृत्वा शमादिषट्कमुदितम् । 'पश्येत्' इति तत्र विध्यध्ययनदर्शनाच्च शमादीनां विहितत्वमवसीयते । तेषामन्तरङ्गत्वं तु भाष्ये स्फुटतरमवगम्यते –

> "स्मृतिष्वपि भगवद्गीताद्यासु अनभिसन्धाय फलमनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवन्तीति प्रपञ्चितम् । तस्मात्, यज्ञादीनि शमदमादीनि च यथाश्रमं सर्वाण्येवाऽऽश्रमकर्माणि विद्योत्पत्तौ अपेक्षितव्यानि । तत्रापि 'एवंवित्' इति विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि; विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनि- इति विवेक्तव्यम् ॥" सू. भा. ३-४-२७, पा. ४४६

इति ॥ ६० ॥

तत्राऽऽश्रमकर्म कर्माङ्गव्यपाश्रयोपासनासंयुक्तम्, तद्वियुक्तं केवलमप्यस्ति । उभयमपि तद् विद्यासाधनमेव । उपासनासंयुक्तं तु वीर्यवत्तरम् । न च कर्म वर्तमानजन्मकृतमेव विद्यासाधनमिति नियमः, इहजन्मकृतकर्माभाववतां प्राक्कर्मसंस्कारानुग्रहादेव ब्रह्मचर्यादेव प्रतिपन्नपारिव्राज्यानामपि साक्षात्साधनमात्रेणापि विद्योत्पत्त्युपपत्तेः । श्रवणमननादीनां तु नियमेनान्तरङ्गसाधनत्वं सर्वत्र । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५, ४-५-६) इति कर्मरहिताया अपि मैत्रेय्यै तत्त्वोपदेशस्य श्रूयमाणत्वात् । तथा च भाष्यम् –

(१) "जन्मान्तरानुष्ठितैरपि चाश्रमकर्मभिः संभवत्येव विद्याया अनुग्रहः । तथा च स्मृतिः 'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्' (गी. ६-४५) इति जन्मान्तरसञ्चितानामपि संस्कारविशेषान् अनुग्रहीतॄन् विद्यायां दर्शयति ॥ " सू. भा. ३-४-३८, पा. ४५१

(२) " तस्मात्, विद्यासंयुक्तं नित्यमग्निहोत्रादि विद्याविहीनं चोभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेन इह जन्मनि जन्मान्तरे च प्राग्ज्ञानोत्पत्तेः कृतं यत् तद्यथासामर्थ्यं ब्रह्माधिगमप्रतिबन्धकारणोपात्त-दुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमनन-श्रद्धातात्पर्याद्यन्तरङ्गकारणापेक्षं ब्रह्मविद्यया सहैककार्यं भवतीति स्थितम् ॥ " सू. भा. ४-१-१८, पा. ४७८

इति ॥

(३) " अत एव च विद्यायाः पुरुषार्थहेतुत्वात्, अग्नीन्धनादी-न्याश्रमकर्माणि विद्यया स्वार्थसिद्धौ नापेक्षितव्यानि ॥ "

सू. भा. ३-४-२५, पा. ४४५

[ अत्र कर्मज्ञानसमुच्चयो निरस्तः ]

(४) " ऊर्ध्वरेतस्सु चाश्रमेषु विद्या श्रूयते । न च तत्र कर्माङ्गत्वं विद्याया उपपद्यते । कर्माभावात् । .... प्रतिपन्नाप्रतिपन्न-गार्हस्थ्यानाम्, अपाकृतानपाकृतर्णत्रयाणां चोर्ध्वरेतस्त्वं श्रुतिस्मृति-प्रसिद्धम् । तस्मादपि स्वातन्त्र्यं विद्यायाः ॥ "

सू. भा. ३-४-१७, पा. ४३८, ४३९

(५) "परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न संभवत्य-ननुष्ठाननिमित्तः। शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी । ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म, यज्ञादीनां चेतरेषाम्, तद्व्यतिक्रमे च तस्य प्रत्यवायः ॥ "

सू. भा. ३-४-२०, पा. ४४२

[ अत्र कर्माभावेऽपि शमादेर्विद्यार्थत्वं नियतमिति दर्शितम् ]

(६) "अनाश्रमित्वेन वर्तमानोऽपि विद्यायामधिक्रियते । कुतः? तद्दृष्टेः। रैक्ववाचक्नवीप्रभृतीनामेवंभूतानामपि ब्रह्मनिष्ठत्वश्रुत्युपलब्धेः । (सू. भा. ३-४-३६) .... तेषामपि विधुरादीनामविरुद्धैः पुरुषमात्रसंबन्धिभिः, जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः संभवति ॥"　　सू. भा. ३-४-३८, पा. ४५१

[ अत्र कर्मरहितानामपि विद्यानुग्राहकधर्मवत्त्वं प्रदर्शितम् ॥ ]

इति च ॥ ६१ ॥

## १४. श्रवणादिसतत्त्वविचारः, सिद्धान्तरीत्या

अथ श्रवणादीनां स्वरूपकार्यादि निरूप्यते । तत्र श्रवणं नाम वेदान्तानामद्वितीयब्रह्मात्मावगतिपर्यन्तज्ञानजनकत्वसामर्थ्यनिर्धारणार्थं वाक्यतात्पर्यनिर्धारणानुकूलविचारणा । अत्र विचारणा न केवलं वेदानां वेदत्वेन प्रामाण्यं स्वीकृत्य, किं तर्हि वेदान्तवाक्यानाम् अनुभवानुसारिज्ञानकारणत्वम्, ज्ञानस्य स्वतःसिद्धाद्वितीयब्रह्मात्मावगतिपर्यन्तत्वं चाभ्युगम्येत्युक्तम् (खं. ८-३२, ३३) । वार्तिककारैरप्युक्तम् – 'न च वेदोक्तितो वेदः श्रद्धेयार्थ इहोच्यते । किं त्वमानत्वहेतूनां वेदवाक्येष्वसंभवात्' (बृ. वा. २-४-३२५) इति । अत एव च भाष्यकारो वाक्यश्रवणमात्रेणापि ब्रह्मावबोधो जायते इत्याह –

(१) "या हि चोदना धर्मस्य लक्षणम्, सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति ; ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते । यथा अक्षार्थसन्निकर्षेण अर्थावबोधे, तद्वत् ॥"　　सू. भा. १-१-१, पा. ५

[ वेदान्तश्रवणजन्यज्ञाने न विधिः संभवतीत्युक्तमत्र । ]

(२) " ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म। फलविषयत्वादिच्छायाः । ज्ञानेन हि प्रमाणेनावगन्तुम् इष्टं ब्रह्म । ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात् । तस्मात्, ब्रह्म जिज्ञासितव्यम् ॥ "

सू. भा. १-१-१, पा. ६

[ अनुभवफलावसानपर्यन्तं वाक्यविचारणा कर्तव्या - इत्युक्तमत्र । ]

(३) " लोकेऽपि 'इदं पश्य', 'इदमाकर्णय'-इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधानमात्रं कुरु' इत्युच्यते, 'न साक्षाज्ज्ञानमेव कुरु' इति। ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते कदाचिन्न जायते । तस्मात्, तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन। तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते ॥ "

सू. भा. ३-२-२१, पा. ३६२

[ लोके श्रवणशब्देन पदार्थज्ञानार्थं श्रोत्रेन्द्रियप्रणिधाने प्रयत्नरूपा क्रिया विवक्ष्यते ; श्रावणं ज्ञानं तु प्रमाणतन्त्रं वस्तुतन्त्रं चेति न विधेयम्-इत्युक्तमत्र ॥ ]

**मननं** नाम, श्रुतिदर्शितमार्गेणैव अद्वितीयब्रह्मात्मस्वरूपनिश्चयार्थम् अनुस्रियमाणः, अनुभवानुसारी अन्वयव्यतिरेकलक्षणस्तर्क इत्युक्तम् (खं. ८, ३४, पा. ४१) । न तु प्रमाणान्तरविरोधःशङ्कानिवारणार्थमाद्रियमाणः, अनुमानादिलक्षणस्तर्क इह संभवति । प्रमाणान्तराविषयत्वाद् ब्रह्मणस्तादृशशङ्काया एवानुत्थानात् । यथाह भाष्यकारः –

(४) " न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनं आगममन्तरेणोत्प्रेक्षितुमपि शक्यम् । रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षगोचरः, लिङ्गाद्यभावाच्च नानुमानादीनाम् इति चावोचाम ॥ "

सू. भा. २-१-११, पा. १९३

इति । यत्र प्रमाणान्तरप्रवृत्तिशङ्कापि नास्ति, तत्र को वाऽवसरः प्रमाणान्तरविरोधशङ्कायाः ? – इति ॥

निदिध्यासनं च ब्रह्मात्मतत्त्वावधारणार्थं पराग्विषयेभ्यो चित्तं व्यावर्त्य स्वात्मन्येव प्रणिधानकरणरूपो मानसव्यापारः । न तु श्रवणमननाभ्यां निश्चितस्यात्मज्ञानस्य, केवलश्रवणज्ञानस्य वा, अभ्यासो मिथ्याप्रत्ययसंस्कारापनयार्थम्, यथाहुः प्रसङ्ख्यानव्यसनिनः । न हि तत्त्वज्ञानम् उत्पन्नम्, मिथ्याप्रत्ययसंस्कारस्तु नापनीत इति युक्तियुक्तं स्याद्वचः । यदाह भाष्यकृत् –

(५) " सकृदुत्पन्नैव हि आत्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते ॥ " सू. भा. ४-१-२, पा. ४६२

इति ॥ ६२ ॥

अथ किंरूपा तर्हि श्रवणादीनामावृत्तिः, किंप्रयोजना च ? – इत्येतन्निरूपणीयम् । प्रथमं तावत् आत्मविषयाः श्रवणादयः न विधीयन्ते इत्येतन्न प्रस्मर्तव्यम् । यदाह भाष्यकृत् –

" यथाभूतात्मविषयमपि ज्ञानं न चोदनातन्त्रम् । तद्विषये लिङादयः श्रूयमाणा अपि अनियोज्यविषयत्वात्, कुण्ठीभवन्ति, उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्; अहेयानुपादेयवस्तुविषयत्वात् । किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि ? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानि – इति ब्रूमः ॥ " सू. भा. १-१-४, पा. १९

इति ॥

श्रवणादीनामावृत्तिस्तु इत्थमुपपादिता भाष्ये –

(१) " भवेदानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वम् अनुभवितुं शक्नुयात् । यस्तु न शक्नोति, तं प्रति उपयुज्यत एवावृत्तिः । तथा हि 'तत्त्वमसि श्वेतकेतो' इत्युपदिश्य 'भूय एव मा

भगवान् विज्ञापयतु' (छां. ६.८.७....) इति पुनः पुनः परिचोद्यमानः, तत्तदाशङ्काकारणं निराकृत्य 'तत्त्वमसि' इत्येवासकृदुपदिशति । तथा च 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.४-५-६) इत्यादि दर्शितम् । ननूक्तं सकृच्छ्रुतं चेत्, तत्त्वमसिवाक्यं स्वमर्थम् अनुभावयितुं न शक्नोति, तत आवर्त्यमानमपि नैव शक्ष्यतीति । नैष दोषः । न हि दृष्टे अनुपपन्नं नाम । दृश्यन्ते सकृच्छ्रुतात् वाक्यात् मन्दप्रतीतं वाक्यार्थम् आवर्तयन्तः, तत्तदाभासव्युदासेन सम्यक् प्रतिपद्यमानाः ॥ "

सू. भा. ४-१-२, पा. ४६१, ४६२

इति । अत्र आवृत्तिर्नाम न 'तत्त्वमसि', 'तत्त्वमसि' – इत्यादिरूपेण वाक्यजपः, नापि उपदिष्टवाक्यानां पुनः पुनः पाठः, किं तर्हि वाक्यार्थविचारणायां प्रवृत्तस्य तत्तद्युक्त्या अनुभवानुसारिण्या अर्थाभास-निराकरणपूर्वकं यथार्थावस्थिताध्यवसानप्रयत्नः–इति गम्यते । उपपत्त्य-न्तरमपि प्राह भाष्यकृत् शास्त्रयुक्त्यभ्यासस्यार्थवत्त्वे –

(२) " अपि च तत्त्वमसीत्येतद् वाक्यं त्वंपदार्थस्य तत्पदार्थ-भावमाचष्टे । तत्पदेन च प्रकृतं सद् ब्रह्म ईक्षितृ, जगतो जन्मादि-कारणम् अभिधीयते । 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१), 'विज्ञान-मानन्दं ब्रह्म' (बृ. ३-९-२८), 'अदृष्टं द्रष्टृ, .... अविज्ञातं विज्ञातृ' (बृ. ३-८-११), 'अजमजरममरम्' (बृ. ४-४-२५?), 'अस्थूल-मनण्वह्रस्वमदीर्घम्' (बृ. ३-८-८) – इत्यादिशास्त्रप्रसिद्धम् । तत्र अजादिशब्दैर्जन्मादयो भावविकारा निवर्तिताः । अस्थूलादिशब्दैश्च स्थौल्यादयो द्रव्यधर्माः । विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्व-मुक्तम् । एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकः, तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः । तथा त्वंपदार्थोऽपि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया संभाव्यमानश्चैतन्यपर्यन्तत्वेनाव-धारितः । तत्र येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां

'तत्त्वमसि' इत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति ; पदार्थ-ज्ञानपूर्वकत्वात् वाक्यार्थ(ज्ञान ?)स्य – इत्यतस्तान् प्रत्येष्टव्यः पदार्थ-विवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः ॥'' सू. भा. ४-१-२, पा. ४६२

इति । अत्र ज्ञेयब्रह्मस्वरूपं तत्पदार्थः ; स तु समन्वयाध्यायदर्शित-नीत्या उपक्रमोपसंहारौ, अभ्यासः, उपपत्तिः, अपूर्वता, फलं चेत्येतै-स्तात्पर्यलिङ्गैः, 'श्रुतिलिङ्गप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य-मर्थविप्रकर्षात्' (जै. सू. ३-३-१४) इत्युक्तप्रमाणैश्चोत्तरोत्तरं दुर्बलैः पूर्वमीमांसापरिशोधितन्यायादेवावधार्यः । त्वंपदार्थस्तु जिज्ञास्वात्म-याथात्म्यं श्रुत्यनुगृहीतान्वयव्यतिरेकतर्कसाहाय्येनावधार्यम् । तत्र येषां सुकृतिनां प्राक्तनसंस्कारविशेषात् पदार्थविषयकः प्रतिबन्धोऽज्ञानादि-लक्षणोऽस्ति, तेषामावृत्तिरावश्यिकी यथोपवर्णिता इत्युक्तमधस्तात् । अथ यदुक्तं शङ्कावादिना, आत्मनो निर्विशेषे ब्रह्मणि सामान्यविशेष-विभागाभावात्, अभ्यासो नापेक्षित इति, तत्राप्याह भाष्यकृत् –

(३) "यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथाप्यध्या-रोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् । तत्रैकेनावधानेनैकमंशम् अपोहति, अपरेणापरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः । तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः ॥ ''

सू. भा. ४-१-२, पा. ४६२

इति ॥

एवं च वेदान्तमीमांसान्यायानुसारेण त्वंपदार्थः शोधयितव्यः । शोधितत्वंपदार्थस्यैव ब्रह्मात्मानुभवो भवेन्नान्यस्य इत्युक्तं भवति ॥ ६३ ॥

अधिगतपदार्थविवेकानां तु श्रवणमात्रेणाप्यनुभवो जायेतैवेति तेषां श्रवणादिसमुच्चयोऽनपेक्षित एवेति सुस्पष्टमाह भाष्यकृत् –

(१) "येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थम् अनुभवितुम् इति तान् प्रत्यावृत्त्यानर्थक्यम् इष्टमेव । सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते ॥" सू. भा. ४-१-२, पा. ४६२

(२) "यथा विधिविषये कर्त्राद्यनेककारकोपसंहारद्वारेण वाक्यार्थज्ञानकालादन्यत्रानुष्ठेयोऽर्थोऽस्त्यग्निहोत्रादिलक्षणः, न तथेह परविद्याविषये, वाक्यार्थज्ञानसमकाल एव तु पर्यवसितो भवति ॥" मुं. भा १-१-६, पा. १४५

इति । अतः श्रवणमात्रमेवालं ब्रह्मात्मावगतये उत्तमाधिकारिणाम् ; अधिकारितारतम्यतस्तु श्रवणावृत्तिः, श्रवणयुक्त्यभ्यासः, निदिध्यासनं चापेक्ष्यत इति सिद्धम् ॥ ६४ ॥

युक्तं चैतत्, न हि स्वयंसिद्धस्य ब्रह्मात्मतत्त्वस्य वाक्येन स्मारणं मुक्त्वा अन्यत् किञ्चिदपेक्षितमिति संभाव्यते । अत एवात्र प्रयत्नं विना वाक्यश्रवणमात्रेण संसारानर्थो न कस्यचिदपि निवर्तेत – इति उपासनादिविधिव्यसनिनां ज्ञानाभ्यासादिव्यसनिनां च शङ्कामुद्भाव्य पर्यहार्षीद् भाष्यकारः –

(१) "सत्यमेवं युज्येत यदि कस्यचिदेवं प्रतिपत्तिर्भवेत् । बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिः । अतो न दुःखित्वाद्यभावं कश्चित् प्रतिपद्यत इति चेत् । न । देहाद्यभिमानवद् दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः । प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वा

'अहं छिद्ये दह्ये' इति च मिथ्याभिमानो दृष्टः। तथा बाह्यतरेष्वपि पुत्रमित्रादिषु संतप्यमानेषु 'अहमेव संतप्ये' इत्यध्यारोपो दृष्टः। तथा दुःखित्वाद्यभिमानोऽपि स्यात्। देहादिवदेव चैतन्याद् बहिरुपलभ्यमानत्वाद् दुःखित्वादीनाम्; सुषुप्त्यादिषु चाननुवृत्तेः। चैतन्यस्य तु सुषुप्तेऽप्यनुवृत्तिमामनन्ति 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति' (बृ. ४-३-२३) इत्यादिना। तस्मात्, सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहम् इत्येष आत्मानुभवः। न चैवम् आत्मानम् अनुभवतः किञ्चिदप्यन्यत् कृत्यमवशिष्यते॥" सू. भा. ४-१-२, पा. ४६३

इति। अत्र देहेन्द्रियमनस्सु तद्धर्मेषु च अहंममाभिमान आध्यासिक एवेत्युपपादितत्वादध्यासभाष्ये, यथा देहादेः स्वयमध्यस्तस्य धर्मो दृश्यत्वात् कल्पितत्वाच्च नात्मनो भवति, एवमेव सांसारिकदुःखमपि नात्मनो भवितुमर्हति, विषयत्वेनोपलभ्यमानत्वात्, अध्यारोपितत्वाच्च इति तर्कः, सुषुप्ते अद्वितीयात्ममात्रावशेषानुभवश्च प्रदर्शितः, उपदेशमात्रेण दुःखित्वनिवृत्तिः स्यादेवेत्यत्र। अतो यथाप्रदर्शितात् अनुभवतोऽन्यः 'साक्षात्कारो' नाम प्रसङ्ख्यानादिलभ्यः-इत्यास्थितवतां वावदूकानां मतं दूरनिरस्तं भवति। न हि कूटस्थनित्यावगतिरूपस्य तस्य सर्वस्याप्यात्मनः साक्षात्कारोऽन्यत आकाङ्क्षितव्यः, 'यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-४-१) इति श्रुतेरिति। यथोक्तमुपदेशसाहस्र्याम् –

(२) विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः।
स स्यादनुभवस्तस्य ततोऽन्योऽनुभवो मृषा॥ उप. १२-८

इति॥ ६५॥

## १५. तत्पदार्थविवेकः

अथ 'तत्त्वमसि'वाक्ये तत्पदार्थविवेचनप्रकारो निरूप्यते । यतः पदार्थज्ञानाधीनमेव वाक्यार्थज्ञानम् । यथाऽऽह भाष्यकृत् –

(१) "येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां 'तत्त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति, पदार्थ-ज्ञानपूर्वकत्वात् वाक्यार्थ(ज्ञान)स्य ॥" सू. भा. ४-१-२, पा. ४६२

इति ॥

न चेह पदार्थत्वं वाक्यार्थत्वं च ब्रह्मणो वास्तविकमभ्युपगम्य पदार्थानां भेदः संसर्गो वा वाक्येन बोध्यत इत्युच्यते भाष्ये, परमात्मनो वाङ्मनसगोचरत्वाभावश्रुतेः, भेदसंसर्गहीनत्वाच्च । यथोक्तं वार्तिककारैः 'भेदसंसर्गहीनत्वात् पदवाक्यार्थतात्मनः । दुःसंभाव्याऽत आत्माऽयमात्मनैवानुभूयते ॥' (बृ. वा. १-४-१४०८) इति । अत एव चात्र वाक्यस्य प्रमोत्पादकत्ववाचोयुक्तिरपि सर्वविशेषविकल्प-प्रतिषेधेनाद्वितीयानुभवस्वरूपब्रह्मात्मतत्त्वसमर्पकत्वमभिप्रेत्यैवेति ज्ञेयम् ॥ ६६ ॥

अलं प्रसक्तानुप्रसक्तविषयचिन्तया । प्रकृतामेव तत्पदार्थ-विवेचनप्रकारचिन्तामनुवर्तयिष्यामः । यद्यपि समन्वयाध्यायोक्तरीत्या सर्ववेदान्तवाक्यार्थविचारणाध्यवसानेनैवाधिगन्तव्यं तत्पदार्थज्ञानम्, तथापि विधिमुखवाक्यानि, निषेधमुखवाक्यानि चेति वाक्यानां द्वैराश्यमाश्रित्येह किञ्चिदुच्यते जिज्ञासूनां पदार्थस्वरूपनिर्णयमार्गे सुखप्रवेशाय ॥

तत्र निषेधमुखेषु तावद् वाक्येषु श्रुताः सर्वेऽपि धर्माः सर्वत्राव-रोद्धव्याः । 'अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्याम् ....' (सू. ३-३-३३) इति सूत्रोक्तन्यायेन निर्विशेषब्रह्मण एवैकस्य स्वरूपं निर्धारयितुं प्रवृत्तत्वात् तेषां वाक्यानाम् । यदाह भाष्यकारः –

(१) "अक्षरविषयास्तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्राव-रोद्धव्याः । सामान्यतद्भावाभ्याम् । समानो हि सर्वत्र विशेषनिराकरण-रूपो ब्रह्मप्रतिपादनप्रकारः । तदेव च सर्वत्र प्रतिपाद्यं ब्रह्म अभिन्नं प्रत्यभिज्ञायते । तत्र किमिति अन्यत्र कृता बुद्धयोऽन्यत्र न स्युः ?"

सू. भा. ३-३-३३, पा. ४०८

इति ॥

तत्र प्रधानानि निषेधवाक्यानीमानि – (१) 'अशब्द-मस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तम्' (का. १-३-१५), 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्' (मुं. १-१-६), 'अच्छायमशरीरमलोहितं शुभ्रम्' (प्र. ४-१०), 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' (तै. २-७); 'अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाश-मसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमन-न्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन' (बृ. ३-८-८), 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' (बृ. २-५-१९), 'शान्त मजरममृतम्' (प्र. ५-७), 'अन्यदेव तद्विदितादथो अविदितादधि' (के. १-४) इति ॥

अत्र यद्यपि प्रतिषेधबुद्धयः सर्वाः सर्वत्रोपसंहर्तव्या इत्याह सूत्रकृत्, तथापि येऽत्र श्रुतिषु कण्ठरवेण प्रतिषिद्धाः, ते एव तु निषिद्धा इति स्यान्मतिः, न तूक्ता अनुक्ताश्च सर्वे विशेषा निषिद्धा इति। अतोऽशेषविशेषप्रतिषेधिन्यपि श्रुतिरिहोदाहर्तव्या निर्विशेषमेव ब्रह्म प्रतिपिपादयिषितमिति बुद्ध्युत्पादनाय; अस्ति चैवंविधा श्रुतिः 'अथात आदेशो नेति नेति' (बृ. २-३-६)। व्याख्यातं चैवमिदं वचनम्। 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' (सू. ३-२-२२) इति सूत्रार्थकथनप्रसङ्गेन भाष्यकृता –

(२) "द्वौ चैतौ प्रतिषेधौ यथासङ्ख्यन्यायेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः। यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधति, उत्तरो वासनाराशिम्॥" पा. ३६५, ३६६

इत्येवं प्रकृतपरामर्शित्वपरत्वम् इतिशब्दयोरभिप्रेत्य व्याख्याय तत्रारुचेराह –

(३) "अथवा 'नेति नेति' इति वीप्सेयम्। इतीति यावत् किञ्चिदुत्प्रेक्ष्यते तत्सर्वं न भवति – इत्यर्थः। परिगणितप्रतिषेधे हि क्रियमाणे, यदि नैतद् ब्रह्म किमन्यद् ब्रह्म भवेत्? – इति जिज्ञासा स्यात्। वीप्सायां तु सत्यां समस्तस्य विषयजातस्य प्रतिषेधात् अविषयः प्रत्यगात्मा ब्रह्म – इति जिज्ञासा निवर्तते। तस्मात् प्रपञ्चमेव ब्रह्मणि कल्पितं प्रतिषेधति, परिशिनष्टि ब्रह्म – इति निर्णयः। यतस्ततः प्रतिषेधाद्भूयो ब्रवीति 'अन्यत् परमस्ति' इति। अभावावसाने हि क्रियमाणे किमन्यत् परमस्तीति ब्रूयात्? तत्रैषा अक्षरयोजना 'नेति नेति' इत्यस्य कोऽर्थः? न ह्येतस्मात् ब्रह्मणो व्यतिरिक्तमस्तीत्यतो नेति नेतीत्युच्यते, न पुनः स्वयमेव नास्तीत्यर्थः। तच्च दर्शयति अन्यत् परम् अप्रतिषिद्धं ब्रह्मास्तीति॥" सू. भा. ३-२-२२, पा. ३६६

अधस्तादुदाहृतभाष्यभागेन 'निरस्तसमस्तविशेषं ब्रह्म' शून्यकल्पम् इत्येषा शङ्का निरस्ता। वाक्यशेषेण तु सर्वविशेषनिषेधद्वारेणैव शक्योपदेशनं ब्रह्म – इत्युपपादितं भाष्ये –

(३) "यदा पुनरेवमक्षराणि योज्यन्ते 'न ह्येतस्मादिति नेति'। न हि प्रपञ्चप्रतिषेधरूपादेशनात् अन्यत् परम् आदेशनम् ब्रह्मणोऽस्तीति, तदा 'ततो ब्रवीति च भूयः' इत्येतत् नामधेयविषयं योजयितव्यम्। 'अथ नामधेयम् सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्' इति हि ब्रवीतीति। तच्च ब्रह्मावसाने प्रतिषेधे समञ्जसं भवति। अभावावसाने प्रतिषेधे किं 'सत्यस्य सत्यम्' इत्युच्येत? तस्मात्, ब्रह्मावसानोऽयं प्रतिषेधः, नाभावावसानः – इत्यध्यवस्यामः॥

सू. भा. ३-२-२२, पा. ३६६

इति। अस्मिन् हि वर्णकान्तरे, न केवलं ब्रह्म निरस्तसमस्तविशेषमपि न शून्यकल्पम् इत्युपपादितम्, किं तु समारोपितसर्वविशेषनिषेधं मुक्त्वा नैवास्त्यन्य उपायो ब्रह्मप्रतिपादने इत्यपि। एतेन निषेधमुखानि लक्षणानि साकाङ्क्षाणि 'नायं सर्पः' इत्यादिवाक्यवत्, विधिमुखान्येव तु 'सत्यं ज्ञानम्' इत्यादीनि निराकाङ्क्षाणि लक्षणानीत्याग्रहाविष्टा वादिनो दूरनिरस्ता भवन्तीति बोध्यम्॥ ६७॥

अथ विधिमुखोपदेशवाक्यानि परिशील्यन्ते। तत्र द्विरूपं ब्रह्मावगम्यते वेदान्तेषु, ज्ञेयम् उपास्यं चेति इत्यवादिष्म उपासनाखण्डे (१०–४४)। तत्र यदाप्युपाधिद्वारेणोपदिश्यते ज्ञेयं ब्रह्म, तदाप्यविवक्षितोपाधिसंबन्धमेव तत्, निरस्तसमस्तविशेषरूपेणैवोपसंहारदर्शनात्। उपास्यं तु ब्रह्म सर्वकारणत्वाद् विकारधर्मैरपि कैश्चिद्विशिष्टम् निर्दिश्यत इति विवक्षितोपाधिसंबन्धमेव भवति इति

स्थितिः । तत्र ज्ञेयं ब्रह्म, **कारणम्**, **अविकृतम्**, **निर्गुणम्**, **निरुपाधिकम्**, **मुख्यम्**, **परम्** – इति च व्यपदिश्यते ; उपास्यं तु **कार्यम्**, **सगुणम्**, **सोपाधिकम्**, **गौणम्**, **अपरम्** – इति च । अत्रेमानि **भाष्यवाक्यान्यनुसंधेयानि** –

(१) " किं द्वे ब्रह्मणी परम् अपरं चेति ? बाढं द्वे 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः' (प्र. ५-२) इत्यादिदर्शनात् । किं पुनः परं ब्रह्म, किमपरमिति ? उच्यते । यत्राविद्याकृतनामरूपादि-विशेषप्रतिषेधात् अस्थूलादिशब्दैर्ब्रह्मोपदिश्यते, तत् परम् ; तदेव यत्र नामरूपादिविशेषेण केनचिदपि विशिष्टम् उपासनायोपदिश्यते 'मनोमयः प्राणशरीरो भारूपः' इत्यादिशब्दैः, तदपरम् । नन्वेवम् अद्वितीयश्रुति-रुपरुध्येत । न । अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात् ॥ "

सू. भा. ४-३-१४, पा. ५०१, ५०२

(२) " परब्रह्मसामीप्यादपरस्य ब्रह्मणः, तस्मिन्नपि ब्रह्मशब्द-प्रयोगो न विरुध्यते । परमेव हि ब्रह्म विशुद्धोपाधिसंबन्धं क्वचित् कैश्चिद् विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानम् अपरम् इति स्थितिः ॥ " सू. भा. ४-३-९, पा. ४९५

उपास्यब्रह्मणीव ज्ञेयेऽपि ब्रह्मणि, ईश्वरपरमेश्वरपरमात्मशब्दाः प्रयुज्यन्ते – इत्यवोचाम (खं. १०-४४, पा. ५१) । एवं परब्रह्म-शब्दोऽपि उपास्ये ब्रह्मणि भाष्यकृता प्रयुज्यत एव । तद्यथा –

(३) " अतः परमेव ब्रह्म ज्योतिःशब्दमिति सिद्धम् ॥ "

सू. भा. १-१-२७, पा. ५६

(४) " अतो विवक्षितगुणोपपत्तेः परमेव ब्रह्मेहोपास्यत्वेनोपदिष्ट-मिति गम्यते ॥ सू. भा. १-२-२, पा. ६५

[ अत्र यदेवापरब्रह्मवाक्यमित्युपदिष्टं प्राक्, परापरब्रह्मविभागोदाहरण-प्रसङ्गेन, तदेव वाक्यं परब्रह्मोपासनपरमिति निर्दिष्टम् ॥ ]

न चैवं परापरविभागानिर्णयः । यत्रोपास्यवाक्यमिति विधिविभक्त्या, गत्याद्युल्लेखलिङ्गाच्च गम्यते, तत्रापेक्षिकः परब्रह्मशब्द इति निर्णेतुं शक्यत्वात् । तथा हि **भाष्यकारः** परशब्दार्थं निर्णेष्यत्यन्यत्र –

(५) " **नन्वपरब्रह्मपरिग्रहे 'परं पुरुषम्' इति विशेषणं नोपपद्यते । नैष दोषः । पिण्डापेक्षया प्राणस्य परत्वोपपत्तेः ॥**

**सू. भा. १-३-१३, पा. १०४**

[यद्यपि शङ्कावादिमतमिदमुदाहृतम्, तथापि 'परं चापरं च ब्रह्म यदोङ्कारः' इति श्रुतौ परं (ब्रह्म) इति विशेषणं आपेक्षिकमपि भवतीति युक्तिरत्रानुसृता, न च सा निराकृता सिद्धान्तावसरे; सैवेहोपास्यब्रह्मणः परत्वेन विशेषणेऽपि युक्तिर्भविष्यतीति । अतोऽनवद्यम् ॥]

तदेवं ज्ञेयब्रह्मणः परत्वेन, उपास्यस्य चापरत्वेन भाष्यकारस्य व्यवहारः इति सामान्यनियमः, आपेक्षिकं तूपास्येऽपि परविशेषणम् इति स्थितम् । अत्रेदमपि भाष्यवाक्यमुपोद्बलकम् –

(६) " **एवं सद्योमुक्तिकारणमप्यात्मज्ञानम् उपाधिविशेषद्वारेणोपदिश्यमानमपि अविवक्षितोपाधिसंबन्धविशेषं परापरविषयत्वेन संदिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति । .... एवमेकमपि ब्रह्मापेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यत इति प्रदर्शयितुं परो ग्रन्थ आरभ्यते ॥** "

**सू. भा. १-१-१२, पा. ३५**

इममेव व्यवहारमाश्रित्य तत्पदार्थनिर्णयः प्रारभ्यते ॥ ६८ ॥

(अ) प्रथमं तावत्, अपरब्रह्मणो यानि विशेषणान्यविद्याकृतनामरूपनिबन्धनानि, उपासनार्थं तान्युपादेयान्यपि तत्पदार्थनिर्णयावसरे परिहरणीयानि, निर्विशेषस्वरूपविरुद्धस्वरूपप्रतिपादनात्; यानि तु अविरुद्धानि ब्रह्मस्वरूपसमर्पकाणि, तान्युपादेयानि । यथाह **भाष्यकारः**–

"इतराणि तु आकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि; उपासनाविधिप्रधानानि हि तानि । तेषु असति विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति – इत्येष विनिगमनायां हेतुः, येनोभयीष्वपि श्रुतिषु सतीषु अनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति ॥"

सू. भा. ३-२-१४, पा. ३५७

(आ) यत्रायतनादिसामान्यात् परापरब्रह्मणोर्गुणोपसंहारः इतरेतरत्र क्रियेत, तत्र अपरस्मिन् ब्रह्मणि भवत्युपासनार्थोऽप्युपसंहारः; परस्मिंस्तु ब्रह्मणि विभूतिप्रदर्शनमात्रं त्विति विज्ञेयम् । परमार्थतो निर्गुणस्य सगुणत्वानुपपत्तेः । तथा हि भाष्ये –

"यदेतच्छान्दोग्ये (छां ८-१-६ ....) हृदयाकाशस्य सत्यकामत्वादिगुणजातमुपलभ्यते, तदितरत्र वाजसनेयके (बृ. ४-४-२२) 'स वा एष महानज आत्मा' इत्यत्र संबध्यते; यच्च वाजसनेयके वशित्वाद्युपलभ्यते तदपीतरत्र 'एष आत्माऽपहतपाप्मा' (छां. ८-१-५) इत्यत्र संबध्यते । कुतः ? आयतनादिसामान्यात् । समानं हि उभयत्रापि हृदयमायतनम्, समानश्च वेद्य ईश्वरः, समानं च तस्य सेतुत्वम्, लोकासंभेदप्रयोजनम्–इत्येवमादि बहुसामान्यं दृश्यते ... । अयं त्वत्र विद्यते विशेषः । सगुणा हि ब्रह्मविद्या छान्दोग्ये उपदिश्यते 'अथ य इहाऽऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्' इत्यात्मवत् कामानामपि वेद्यत्वश्रवणात् । वाजसनेयके तु निर्गुणमेव ब्रह्मोपदिश्यते 'अत ऊर्ध्वं विमोक्षायैव ब्रूहि', 'असङ्गो ह्ययं पुरुषः' इत्यादिप्रश्नप्रतिवचनसमन्वयात् । वशित्वादि तु, तत्स्तुत्यर्थमेव गुणजातः वाजसनेयके संकीर्त्यते । तथा च उपरिष्टात् 'स एष नेतिनेत्यात्मा' इत्यादिना निर्गुणमेव ब्रह्मोपसंहरति । गुणवतस्तु ब्रह्मण एकत्वात् । विभूतिप्रदर्शनायायं गुणोपसंहारः सूत्रितो नोपासनाय – इति द्रष्टव्यम् ॥"

सू. भा. ३-३-३९, पा. ४१२

(इ) उपासकाः कार्यमेव ब्रह्म गच्छन्ति, तस्य गन्तव्यत्वोपपत्तेः अतस्तत्प्रसङ्गेन यदुपवर्ण्यते ब्रह्मणो रूपम्, न तत् तत्पदार्थनिर्णये उपयुज्यते । भाष्यं चात्र भवति –

(१) "अस्य हि कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते प्रदेशवत्त्वात्; न तु परस्मिन् ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वा अवकल्पते । सर्वगतत्वात् प्रत्यगात्मत्वाच्च गन्तृणाम् ॥"

सू. भा. ४-३-७, पा. ४९५

(२) "यत्रापि ब्रह्म प्रकृत्य गतिरुच्यते यथा 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छां. ४-१०-५) इति । 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' (छां. ८-१-१) इति च, तत्रापि वामनीत्वादिभिः, सत्यकामादिभिश्च गुणैः सगुणस्यैवोपास्यत्वात् संभवति गतिः । न क्वचिद् परब्रह्मविषया गतिः श्राव्यते, यथा गतिप्रतिषेधः श्रावितः 'न तस्य प्राणा उत्क्रामन्ति' (बृ. ४-४-६) इति । 'ब्रह्मविदाप्नोति परम्' (तै. २-१) इत्यादिषु तु सत्यप्याप्नोतेर्गत्यर्थत्वे वर्णितेन न्यायेन देशान्तरप्राप्त्यसंभवात् स्वरूपप्रतिपत्तिरेवेयम् अविद्याध्यारोपितनामरूपप्रविलयापेक्षया अभिधीयते 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-७) इत्यादिवदिति द्रष्टव्यम् ॥"	सू.भा. ४-३-१४, पा. ५०१

(ई) उपासनाफलविषयेऽपि निर्गुणब्रह्मणि श्रूयमाणा धर्माः न तत्स्वरूपसंबन्धिन इति निश्चेतव्यम् । तथा च भाष्यम् –

"यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते, तथापि शब्दविकल्पका एवैते । पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते । चैतन्यमेव तु अस्याऽऽत्मनः स्वरूपमिति तन्मात्रेण स्वरूपेणाभिनिष्पत्तिर्युक्ता । तथा च श्रुतिः 'एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ. ४-५-१३) इत्येवञ्जातीयका अनुगृहीता भविष्यति । सत्यकामत्वादयस्तु

यद्यपि वस्तुस्वरूपेणैव धर्मा उच्यन्ते 'सत्याः कामा अस्य' – इति, तथाप्युपाधिसंबन्धाधीनत्वात् तेषां न चैतन्यवत्स्वरूपत्वसंभवः। अनेकाकारत्वप्रतिषेधात्। प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वम् 'न स्थानतोऽपि परस्योभयलिङ्गम्' (सू. ३-२-११) इत्यत्र। अत एव च जक्षणादिसंकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थम् 'आत्मरतिः' (छां.) इत्यादिवत्। न हि मुख्यान्येव रतिक्रीडामिथुनानि आत्मनि शक्यन्ते वर्णयितुम्। द्वितीयविषयत्वात् तेषाम्। तस्मात्, निरस्ताशेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मना अभिनिष्पद्यते इत्यौडुलोमिराचार्यो मन्यते॥"

सू. भा. ४-४-६, पा. ५०६

उत्तरसूत्रे बादरायणमतेन ब्राह्मस्यैश्वर्यस्यापि प्राप्तिरनुमता, व्यावहारिक्येवेत्यतोऽयमेव सिद्धान्त इति स्पष्टम् ॥ ६९ ॥

ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिषु यानि विधिरूपाणि विशेषणानि श्रूयन्ते ते सर्वे सर्वत्रानुसंधेयाः, न यावन्तो यत्र श्रुतास्तावन्त एव तत्र प्रतिपत्तव्या इति नियमोऽस्ति। आह हि भाष्यकारः –

"आनन्दादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः। कस्मात्? सर्वाभेदादेव। सर्वत्र हि तदेवैकं प्रधानं विशेष्यं ब्रह्म न भिद्यते। तस्मात् सार्वत्रिकत्वं ब्रह्मधर्माणाम्॥"

सू. भा. ३-३-११, पा. ३८५

इति। अत्र कतिचिद् विधिरूपाणि विशेषणानि संगृह्यन्ते जिज्ञासूनां प्रतिपत्तिसौकर्याय –

(१) 'सत्', 'सत्यम्', 'सत्यस्य सत्यम्'।

(२) 'ज्ञानम्', 'विज्ञानम्', 'प्राज्ञः', 'विज्ञानघनः', 'प्रज्ञानघनः'।

(३) 'आनन्दम्', 'सुखम्', 'खं ब्रह्म, कं ब्रह्म'।

(४) 'सर्वगतः', 'सर्वस्याऽऽत्मा'।

(५) 'ब्रह्म', 'आत्मा', 'भूमा', 'पुरुषः'।

अत्र सद्ब्रह्मभूमाऽऽत्मादिविशेषणानि यद्यपि शब्दव्युत्पत्त्याश्रयणे सत्ताबृहत्त्वबहुत्वव्यापित्वादिधर्मवाचका इव प्रतिभायुः, यद्यपि च भाष्यकारोऽपि, आनन्दादयः प्रधानस्य ब्रह्मणो 'धर्माः' – इत्येव व्यवहरति, तथापि निर्विशेषतत्त्वगमकान्येवैतानीति प्रकरणादिसमाश्रयणात्, भाष्ये सदादिशब्दनिर्वचनाच्चावगम्यते। तद्यथा –

(अ) 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६-२-१) इत्यत्र सर्वमिदं कार्यजातं सदेवासीत् इति वचनात्, 'एकमेवाद्वितीयम्' इति च विशेषणादानाच्च निष्प्रपञ्चतत्त्वमेव सच्छब्देन प्रतिपिपादयिषितमिति गम्यते। निर्वक्ति च भाष्यकारः –

" 'सत्' इति अस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं विज्ञानम् यदवगम्यते सर्ववेदान्तेभ्यः॥ "

छां. भा. ६-२-१, पा. ५०६

इति। परेण च सत्तासामान्यं व्यावर्तयति –

" प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः। प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात्; न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति। तस्मात्, वैशेषिकपरिकल्पितात् सतोऽन्यत् कारणमिदं सदुच्यते मृदादिदृष्टान्तेभ्यः॥ " छां. भा. ६-२-१, पा. ५०७

इति॥

(आ) एवं ब्रह्मशब्दोऽपि निर्विशेषाद्वितीयतत्त्वमेव गमयति, 'ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च

प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' (मुं. २-२-११) इति श्रुतेः ; भाष्याच्च —

"ब्रह्मैवेदं विश्वं समस्तम् इदं जगत्, वरिष्ठं वरतमम् । अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्पप्रत्ययः ॥ "

मुं॰ भा॰ २-२-११, पा॰ १६४

इति ॥

(इ) एवम् आत्मशब्दार्थोऽपि 'आत्मा वा इदमेक एवाग्र आसीत् । नान्यत्किञ्चन मिषत्' (ऐ. १-१-१) इति श्रुतिबलात् सच्छब्दार्थ इव निर्विशेषपरमात्मवस्त्वेवेति गम्यते । भाष्याच्च —

"आत्मा आप्नोतेरत्तेरततेर्वा सर्वज्ञः, सर्वशक्तिः, अशनायादिसर्वसंसारधर्मवर्जितः, नित्यशुद्धबुद्धमुक्तस्वभावोऽजोऽजरोऽमरोऽमृतोऽभयोऽद्वयः .... ॥ "

ऐ॰ भा॰ १-१-१, पा॰ ३३०

इति ॥

(ई) एवम् भूमशब्दोऽपि 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इत्यन्यनिषेधश्रुतेः । भाष्याच्च —

"अविद्यावस्थायां अन्यदर्शनानुवादेन च भूम्नस्तदभावत्वलक्षणस्य विवक्षितत्वात्, 'नान्यत् पश्यति' इति विशेषणम् । तस्मात् संसारव्यवहारो भूम्नि नास्तीति समुदायार्थः ॥ "

छां॰ भा॰ ७-२४-१, पा॰ ५१२

इति । एवं सत्यादिविशेषणविषयेऽपि श्रुतिप्रामाण्यात्, भाष्ये तथा व्याख्यानाच्च निर्विशेषवस्तुपरत्वमूह्यम् ॥ ७० ॥

यत्रापि विधिरूपविशेषणानि समवेतानि ब्रह्मविशेष्यकानीव पदसमन्वयाद् भासन्ते, तत्रापि न पदानां विशेष्यविशेषणभावेन समन्वयः

शङ्क्यः । यतः सर्वत्रापि निरस्तसमस्तविशेषमेकमेव ब्रह्म लिलक्षयिषितम् । न च स्वगतभेदोऽस्ति ब्रह्मणि, येन विशेष्यविशेषणभावेन संबध्येरंस्तल्लक्षणवाक्यगतानि पदानि । अतो नैवास्ति कश्चिद्विशेषो विधिमुखानां लक्षणवाक्यानां निषेधमुखवाक्येभ्यः । अत्र भवन्तीमानि भाष्यवाक्यानि –

**(१) "लक्षणार्थप्रधानानि विशेषणानि न विशेषणप्रधानान्येव । कः पुनर्लक्षणलक्ष्ययोर्विशेषणविशेष्ययोर्वा विशेष इति ? उच्यते । समानजातीयेभ्य एव निवर्तकानि विशेषणानि विशेष्यस्य, लक्षणं तु सर्वत एव, यथा 'अवकाशप्रदातृ आकाशम्' इति ॥"**

**तै. भा. २-१, पा. २८३**

[अत्र सत्यम्, ज्ञानम्, अनन्तम् – इति चैकैकमपि लक्षणं ब्रह्मणः ; अतः सर्वस्मात् अनृतजडपरिच्छिन्नलक्षणादब्रह्मणो व्यावर्तयति ब्रह्म लक्षणवाक्यम् इत्यभिप्रायः । न तु वस्तुसदेव सजातीयं विजातीयं वा अस्ति ब्रह्मण इति विवक्षितमिति ध्येयम् । एतच्च समनन्तरोदाहरणेन स्फुटीभविष्यति ॥]

**(२) "सत्यादिशब्दाः न परस्परं संबध्यन्ते, परार्थत्वात् ; विशेष्यार्था हि ते । अत एकैको विशेषणशब्दः परस्परनिरपेक्षो ब्रह्मशब्देन संबध्यते ॥"** **तै. भा. २-१, पा. २८३**

**(३) "सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम् ; यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरत् अनृतम् इत्युच्यते । अतो विकारोऽनृतम्, 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, एवं सदेव सत्यम्' इत्यवधारणात् । अतः 'सत्यं ब्रह्म' इति ब्रह्म विकारान्निवर्तयति ॥"** **तै. भा. २-१, पा. २८३**

(आ)[1] 'ज्ञानं ब्रह्म' इति कर्तृत्वादिकारकनिवृत्त्यर्थम्, मृदादिवदचिद्रूपतानिवृत्त्यर्थं च प्रयुज्यते ॥

(४) " 'ज्ञानं ब्रह्म' इति वचनात् प्राप्तमन्तवत्त्वम् । लौकिकस्य ज्ञानस्य अन्तवत्त्वदर्शनात् । अतः, तन्निवृत्त्यर्थमाह 'अनन्तम्' इति ॥ "
तै. भा. २-१, पा. २८४

(५) " एवं सत्यादिशब्दाः इतरेतरसन्निधानात् अन्योन्यनियम्यनियामकाः सन्तः, सत्यादिशब्दवाच्यात् तन्निवर्तकाः ब्रह्मणो लक्षणार्थाश्च भवन्तीत्यतः सिद्धं ' यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह ', ' अनिरुक्तेऽनिलयने ' – इति चावाच्यत्वम् , नीलोत्पलवद्वाक्यार्थत्वं च ब्रह्मणः ॥ " तै. भा. २-१, पा. २८५

अत्र वाक्ये सत्यादिशब्दवाच्यत्वम्, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति विशेषणविशिष्टत्वेन नीलोत्पलवद् वाक्यार्थत्वं च कण्ठरवेण निराकृतम् । यत्पुनर्भाष्यम् –

" सर्वविशेषप्रत्यस्तमितत्वात् ब्रह्मणो बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते 'सत्यं ब्रह्म' इति, न तु सत्यशब्दवाच्यमेव ब्रह्म । "
तै. भा. २-१, पा. २८५

इत्यादि, तत्र शब्दवाच्यत्वं ब्रह्मणो नास्ति – इत्यत्रैव तात्पर्यम्, न तु शब्दलक्ष्यम्–इत्यत्रापि ; सर्वशब्दप्रवृत्तिनिमित्तविशेषरहितत्वाभ्युपगमात् तस्मिन् कस्या अपि शब्दवृत्तेरनवकाशात् । यत्रापि कण्ठरवेण शब्दवाच्यत्वमप्युक्तमिव भाष्ये –

" अतो यस्मिन्नप्ययः सर्वेषां चेतनानाम् , तच्चेतनं सच्छब्दवाच्यं जगतः कारणम् , न प्रधानम् । " सू. भा. १-१-९, पा. ३३

इत्यादिस्थलेषु, तत्रापि ब्रह्मणः सबीजत्वाभ्युपगमेनैव तथा व्यवहारः । न तु सद्ब्रह्मणः स्वरूपमेव शब्दवाच्यमित्यभिप्रेत्य । तथा हि माण्डूक्यभाष्यवचनम् –

" जीवप्रसवबीजात्मकत्वमपरित्यज्यैव प्राणशब्दवाच्यत्वं सतः, सच्छब्दवाच्यता च । " गौ. का. १-२, पा. १८३

इति । एवं च अध्यारोपितकारणत्वोपाध्यपेक्षयैव शब्दवाच्यत्ववाचोयुक्तिः, न तु सतः शुद्धरूपस्यापि शब्दवाच्यत्वमभ्यनुज्ञायत इति सर्वमनवद्यम् । अतः सिद्धमिदं विधिरूपविशेषणैर्लक्षितमपि ब्रह्म निषेधरूपविशेषणैरिव सकलसविशेषवस्तुधर्मव्यावृत्त्यर्थमेवेति । न चैवं सर्वथा निर्धर्मकत्वे ब्रह्मणः शून्यत्वकल्पना भवेदिति शङ्क्यम् ; सर्वविशेषनिराकरणेऽपि निर्विशेषब्रह्मात्मस्वरूपसमर्पकत्वाद् वाक्यस्य । भवति चात्र भाष्यम् –

(१) " सत्यादीनामनृतादिधर्मनिवृत्तिपरत्वात्, विशेष्यस्य च ब्रह्मणः उत्पलादिवदप्रसिद्धत्वात्

' मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः ।
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ॥ '

इतिवत् शून्यार्थकतैव प्राप्ता सत्यादिवाक्यस्य इति चेत्, न । लक्षणार्थत्वात् । विशेषणत्वेऽपि सत्यादीनां लक्षणार्थप्राधान्यम् – इत्यवोचाम । शून्ये हि लक्ष्ये अनर्थकं लक्षणवचनम् ॥ " तै.भा. २-१, पा. २८४

[ ब्रह्म हि अत्र लक्ष्यम् ; तच्चात्मा सर्वस्येति न शून्यता तस्य–इति भावः ॥ ]

(२) " योऽसौ उपनिषत्स्वेवाधिगतः पुरुषः, असंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः, स्वप्रकरणस्थः, अनन्यशेषः, नासौ नास्ति, नाधिगम्यत इति वा शक्यं वदितुम् । ' स एष नेतिनेत्यात्मा ' (बृ. ३-९-२६) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुम् अशक्यत्वात्, य एव निराकर्ता, तस्यैवाऽऽत्मत्वात् । नन्वात्माऽहंप्रत्ययविषयत्वात् उपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम् । न । तत्साक्षित्वेन प्रत्युक्तत्वात् ॥ सू. भा. १-१-४, पा. १९, २०

इति ॥ ७१ ॥

सत्यज्ञानादीनि परस्परनिरपेक्षाण्येव प्रत्येकं ब्रह्मलक्षणम् – इत्यभ्युपगमात् सत्यत्वज्ञानत्वादीनि परस्परव्यावृत्तधर्मविशेषा एवेति तु न भ्रमितव्यम् । तथा हि निरस्तसर्वविशेषं ब्रह्मेति सिद्धान्त एव हापितः स्यात्, 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म' – इत्यादिलक्षणवाक्येषु विशेषणानां समवायेनापि प्रयोगदर्शनात् । तदेव ह्येकं ब्रह्मतत्त्वं सत्यादिशब्दैर्व्यवह्रियते श्रुत्या यथा श्रोतॄणां चित्तं निराकुलं तत्रावतरेदिति । एतदपि स्फुटीकृतं भाष्ये निर्विशेषब्रह्मवाद्येकदेशिनां वृत्तिकाराणां सूत्रार्थव्याख्यानप्रकारनिराकरणप्रसङ्गेन –

> "न च सल्लक्षणमेव ब्रह्म, न बोधलक्षणम् इति शक्यं वक्तुम्; विज्ञानघन एवेत्यादिश्रुतिवैयर्थ्यप्रसङ्गात् । कथं वा निरस्तचैतन्यं ब्रह्म चेतनस्य जीवस्यात्मत्वेनोपदिश्येत ? नापि बोधलक्षणमेव ब्रह्म न सल्लक्षणम् इति शक्यं वक्तुम्; 'अस्तीत्येवोपलब्धव्यः' (का.) इत्यादिश्रुतिवैयर्थ्यप्रसङ्गात् । कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत ? नाप्युभयलक्षणमेव ब्रह्म – इति शक्यं वक्तुम्; पूर्वाभ्युपगमविरोधप्रसङ्गात् । सत्ताव्यावृत्तेन च बोधेन, बोधव्यावृत्तया च सत्तया उपेतं ब्रह्म प्रतिजानानस्य तदेव पूर्वाधिकरणप्रतिषिद्धं सप्रपञ्चत्वं ब्रह्मणः प्रसज्येत । श्रुतत्वाददोषः – इति चेत्, न एकस्यानेकस्वभावत्वानुपपत्तेः । अथ सत्तैव बोधः, बोध एव च सत्ता, नानयोः परस्परव्यावृत्तिरस्ति – इति यद्युच्येत, तथापि किं सल्लक्षणं ब्रह्म, उत बोधलक्षणम्, उतोभयलक्षणम् – इत्ययं विकल्पो निरालम्बन एव स्यात् ॥" सू. भा. ३-२-२१, पा. ३६०

इति ॥

न चैवं परस्पराव्यतिरिक्तत्वेन विशेषणानां सत्यज्ञानादिशब्दानां 'हस्तः, करः, पाणिः' इतिवत् पर्यायत्वापत्तिः, व्यर्थता च विशेषणा-

नाम् ; तथा चोद्देश्यविधेयसमन्वयेन विशेषार्थबोधकवाक्यत्वमेव न स्यात् ‘ सत्यं ज्ञानमनन्तं ब्रह्म ’ इत्यादीनाम् – इति शङ्क्यम् । यथा देवदत्तस्यैकस्यैव पुत्रपितृश्वशुरादिव्यपेक्षया ‘ अमुष्य पिता ’, ‘ अमुष्य पुत्रः’, ‘अमुष्य जामाता’– इत्येवमादिरीत्या भिन्नभिन्नशब्दैर्व्यवहारः, एवमत्रापि अनृतजडदुःखादिव्यावर्त्यविशेषापेक्षया भिन्नभिन्नशब्द-प्रयोगोपपत्तेः, न चैवमपि लोके कस्यचिदर्थस्य ‘अस्ति’ इति भानकाले एव ‘ज्ञानम्’ इत्यपि भानप्रसङ्गः, एकस्यैव ब्रह्मणस्तत्र तथाऽवभासात्– इति शङ्कनीयम्, ‘ सच्च त्यच्चाभवत् । .... विज्ञानं चाविज्ञानं च ’ इत्यादिश्रुत्युपदिष्टदिशा क्वचिदस्तित्वरूपेण, क्वचिच्च ज्ञानरूपेण भाने बाधकाभावात्, एकस्या एव रज्ज्वाः कस्यचित् सर्परूपेण भासमानाया-स्तत्समसमये एवान्यस्य भूच्छिद्ररूपेण भासमानायाः, एकस्यैव पुरुषस्य किं कारणं रूपद्वयेनापि प्रत्यवभासो न भवति ? – इत्याक्षेपानुप-पत्तिवत्, यथोत्थापिताक्षेपस्याप्यनुपपत्तेः । यथादृष्टमेव हि वस्तुस्वभावो व्यवस्थापयितव्य इति ॥ ७२ ॥

एवम् ‘आकाशः’, ‘प्राणः’, ‘तेजः’, ‘ज्योतिः’, ‘चक्षुषश्चक्षुः’, ‘श्रोत्रस्य श्रोत्रम्’, ‘प्राणस्य प्राणः’, ‘मनसो मनः’ – इत्यादिष्वपि तत्तच्छब्दप्रवृत्तिनिमित्तवद् भूतेन्द्रियादिकं व्यावर्त्य श्रुतिबलात्, वाक्य-शेषादिप्रामाण्याच्च निर्विशेषमेव तत्त्वं विवक्षितमित्यवसेयम् ; स एव च तत्पदार्थः – इति च । तदेतदुक्तं भाष्ये –

“एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकः, तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः” सू. भा. ४-१-२, पा. ४६२

इति ॥ ७३ ॥

तत्र सर्वत्रापि तत्पदार्थविवेचने, ईश्वरत्वम्, सर्वज्ञत्वम्, सर्वशक्तित्वम्, स्रष्टृत्वम्, जगद्रूपेण परिणामः – इत्यादयो धर्माः, ब्रह्मवस्तुनि श्रोतृचित्तावतारार्थं वेदान्तेषूपदिष्टा अपि तत्पदार्थस्वरूपे न प्रवेशयितव्याः ; सर्वगतत्वम्, सर्वात्मत्वम् – इत्यादयस्तु, अविवक्षितम् उपाधिसंबन्धं निरस्य निष्प्रपञ्चचैतन्यरूपमात्रनिर्देशकत्वेनावसातव्याः – इति संस्मर्तव्यम् । यत्तु भाष्यम् " तत्त्वमसीत्येतद् वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे । तत्पदेन च प्रकृतं सद्ब्रह्म, ईक्षितृ, जगतो जन्मादिकारणम् अभिधीयते " (सू. भा. ४–१–२) इति, " न हि ईश्वरस्य संसार्यात्मत्वम् प्रतिपाद्यत इत्यभ्युपगच्छामः, किं तर्हि संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति " (सू. भा. ४-१-३) इति च ; न तज्जगत्कारणत्वम्, ईश्वरत्वम्, सच्छब्दाद्यभिधेयत्वम् – इत्येवमाद्यपि तत्पदार्थस्वरूपे निविष्टम् – इत्यभिप्रायकम्, किं तर्हि यो जगत्कारणत्वाद्युपाध्याश्रयणेनोपदिश्यते, सोऽविवक्षितोपाधिसंबन्धस्तत्पदार्थः – इत्याशयवत् । यतोऽनुपदमेव ब्रवीति वाक्यशेषे 'व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थः ' इति । ' संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितम् ' इति च । न हि केवलानुभवात्मके कार्यकारणविभागः, ईशितव्यरहितस्येश्वरत्वं वा संस्यात् । उक्तं च कण्ठरवेणापि माण्डूक्यभाष्ये –

" यद्यपि सद्ब्रह्म प्राणशब्दवाच्यं तत्र, तथापि जीवप्रसवबीजात्मकत्वमपरित्यज्यैव प्राणशब्दत्वं सतः सच्छब्दवाच्यता च । यदि हि निर्बीजरूपं विवक्षितं ब्रह्माभविष्यत्, ' नेति नेति ', ' यतो वाचो निवर्तन्ते ', ' अन्यदेव तद्विदितादथो अविदितात् ' इत्यवक्ष्यत् । ' न

सत्तन्नासदुच्यते' इति स्मृतेः। .... तस्मात् सबीजत्वाभ्युपगमेनैव सतः प्राणत्वव्यपदेशः, सर्वश्रुतिषु च कारणत्वव्यपदेशः। अत एव 'अक्षरात्परतः परः', 'स बाह्याभ्यन्तरो ह्यजः', 'यतो वाचो निवर्तन्ते', 'नेति नेति'-इत्यादिना बीजत्वापनयनेन व्यपदेशः॥"

गौ॰ का॰ भा॰ १-२, पा॰ १८३

इति। सर्वथापि तु निषेधवाक्येष्विव विधिमुखवाक्येष्वपि नित्यनिरस्तप्रपञ्चमेव ब्रह्म तत्पदार्थ इति सिद्धम्। इति तत्पदार्थो निरूपितः॥ ७४॥

## १६. त्वंपदार्थविवेकः

अथ त्वंपदार्थो विवेचनीयः। यतस्तत्त्वमसीति श्राावितस्यासंभावना जायते 'कथमहं जन्मादिमान्, कर्ता, भोक्ता, सुखी, दुःखी च संसारी सन्, शास्त्रोक्तमजाद्वितीयं परं ब्रह्म स्याम्?'- इति। तत्र जीवस्य जन्मादिव्यवहारः (खं. ६), प्रमातृत्वपुरःसरः प्रमाणप्रमेयव्यवहारः (खं. ७), कर्तृत्वभोक्तृत्वव्यवहारः (खं. ९), उपास्योपासकव्यवहारः (खं. १०), गत्यागती (१०-४६) - इत्यादिसर्वमपि अविद्यापुरःसरमेवेति सविस्तरं प्रतिपादितं प्राक्, पुनरपीह सङ्क्षेपेण प्रदर्श्यते वाक्यार्थप्रतिपत्तये पदार्थशुद्ध्यर्थम्॥ ७५॥

तत्र जीवो नाम शरीरेन्द्रियसंघाताध्यक्ष आत्मा कर्मफलसंबन्धी; स च 'जन्मादिविक्रियावानहम्' इति मन्यते। अस्ति च तथैव लौकिको व्यपदेशः 'जातो देवदत्तः, मृतो देवदत्तः' इति। जातकर्मादिसंस्कारविधानं च लैाकिकम्। सर्वं तु तदुपाध्यपेक्षमिति सूत्रम्। तद्भाष्यं च -

" स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ। स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते च। अतस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ, तत्स्थे जीवात्मन्युपचर्येते। तद्भावभावित्वात्। शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतो नासतोः। न हि शरीरसंबन्धादन्यत्र जीवो जातो मृतो वा केनचिल्लक्ष्यते। 'स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः, स उत्क्रामन् म्रियमाणः' (बृ. ४-३-८) इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति। जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यम्; अभावाज्जीवप्रादुर्भावस्य ॥ " सू. भा. २-३-१६, पा. २७७

इति। इदं तु अनादिमिथ्याज्ञानलक्षणामविद्यामाश्रित्यैव। वस्तुतस्तु जीवात्मनः सशरीरत्वं न शक्योपपादनमिति सविस्तरं प्रतिपादितं भाष्ये –

(१) " न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वम्, अकर्मनिमित्तत्वात् इत्यवोचाम .... ॥ " सू. भा १-१-४, पा. २२

इति ॥

'सशरीरत्वम्' इत्यत्रेन्द्रियमनोवत्त्वमपि ग्रहीतव्यम्। यथोक्तं छान्दोग्यभाष्ये –

(२) " शरीरमिति अत्र सहेन्द्रियमनोभिरुच्यते। .... अशरीरस्वभावस्याऽऽत्मनः 'तदेवाहं शरीरम्, शरीरमेव चाहम्' इत्यविवेकात्मभावः सशरीरत्वम्। अत एव सशरीरः सन् आत्तो मृत्युना .... ॥ "

छां. भा. ८-१२-१, पा. ५९५

इति ॥

एवं चाविद्याकृतशरीराद्युपाध्यात्मभावेनैव जन्ममरणादि-

व्यवहार इति सिध्यति । तदेवमात्मानात्मनोरितरेतराध्यासकृत एव जीवस्य सर्वोऽपि व्यवहारः – इत्युत्तरत्राप्यनुसंधेयम् ॥

न केवलम् उपाधिजन्ममरणाभ्यां न जन्ममरणौ जीवस्य, किं तु स्वतोऽपि भूतादेरिवोत्पत्तिर्नास्ति, अविकृतस्यैव ब्रह्मणो जीवात्मना अवस्थानात् इति प्रतिपादितम् 'नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः' (सू. २-३-१७) इति सूत्रे, व्याख्यातं च भाष्ये । तदिदं विस्तरेणात्रापि प्रतिपादितं पूर्वम् (खं. ६-२३), उत्पत्त्यादि तु घटाकाशादेरुत्पत्त्यादिकमिव नेतव्यमिति चोपपादितं तत्रैव ॥ ७६ ॥

आत्मनः प्रमातृत्वं शरीरेन्द्रियाद्युपाध्यविवेककृतमिति सविस्तरमुपपादितम् (खं. ७-२५) पूर्वमेव । उपाध्युपशमे तु सुषुप्ताद्यवस्थायामपि चैतन्यमात्रस्वरूपेणावतिष्ठमानत्वं श्रुत्यवगतम्, सर्वेणापि सुषुप्तेरनुभूयमानत्वाच्च सिद्धं भवति ॥ भाष्यं च भवति –

(१) "विज्ञानमयप्रक्रियायां च श्रुतयो भवन्ति 'असुप्तः सुप्तानभिचाकशीति' (बृ. ४-३-११), 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' (बृ. ४-३-९) इति, 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' (बृ. ४-३-३०) इत्येवंरूपाः । 'अथ यो वेदेदं जिघ्राणीति स आत्मा' (छां. ८-१२-४) इति च सर्वैः करणद्वारैः 'इदं वेद', 'इदं वेद' – इति विज्ञानेनानुसंधानात्, तद्रूपत्वसिद्धिः । नित्यस्वरूपचैतन्यत्वे घ्राणाद्यानर्थक्यम् इति चेत्, न, गन्धादिविषयविशेषपरिच्छेदार्थत्वात् । तथा हि दर्शयति 'गन्धाय घ्राणम्' इत्यादि । यत्तु सुप्तादयो न चेतयन्त इति, तस्य श्रुत्यैव परिहारोऽभिहितः । सुषुप्तं प्रकृत्य 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं

यत्पश्येत्' (बृ. ४-३-२३) इत्यादिना। एतदुक्तं भवति – विषयाभावादियमचेतयमानता न चैतन्याभावादिति ॥"

सू. भा. २-३-१८, पा. २८०, २८१

इति ॥ ७७ ॥

यथा गन्धघ्रातृत्वादिविशेषज्ञानमुपाधिपरिच्छेदकृतम्, स्वतस्तु स्वरूपज्ञानेनैव ज्ञत्वमित्यवसितम्, एवं – यद्यपि व्यवहारे उत्क्रान्तिगत्यागतीनां श्रवणात्, साक्षादणुत्वश्रवणात्, शरीरैकदेशेऽवस्थितत्वात्, गन्धादिगुणवत् गुणिनं व्यतिरिच्यापि प्रसरणोपपत्तेश्च जीवस्याणुत्वं यद्यपि शक्याध्यवसानम्, तथापि–तस्याणुत्वं बुद्ध्युपाधिगुणानुसारित्वादेवेति, बुद्ध्युपाधिसंबन्धश्चानाद्यविद्यावशादित्येव तु युक्तं विनिश्चेतुम्। ब्रह्मव्यतिरिक्तचेतनप्रतिषेधश्रुतेः, बुद्धिगुणसारत्वश्रुतेश्च। बुद्धिसंबन्धस्य च मिथ्याज्ञानकृतत्वात् परमार्थतो ब्रह्मणा एकत्वमपि सुस्थितं भवति। तथा हि भाष्यवचनानि –

(१) "न हि बुद्धिगुणैर्विना केवलस्याऽऽत्मनः संसारित्वमस्ति। बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणो नित्यमुक्तस्य सत आत्मनः। तस्मात्, तद्गुणसारत्वात्, बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः। तदुत्क्रान्त्यादिभिश्च अस्योत्क्रान्त्यादिव्यपदेशो न स्वतः। तथा च 'वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥' (श्वे. ५-९) इत्यणुत्वं जीवस्योक्त्वा तस्यैव, पुनरानन्त्यमाह। तच्चैवमेव समञ्जसं स्यात्, यद्यौपचारिकमणुत्वं जीवस्य भवेत्, पारमार्थिकं चानन्त्यम्। .... एवम् उपाधिगुणसारत्वात् जीवस्याणुत्वादिव्यपदेशः। प्राज्ञवत्। यथा प्राज्ञस्य परमात्मनः, सगुणेषूपासनेषु उपाधिगुणसारत्वात् अणीयस्त्वादिव्यपदेशः ॥" सू. भा. २-३-२९, पा. २८६, २८७

(२) "यावदेव चायं बुद्ध्युपाधिसंबन्धः, तावज्जीवस्य जीवत्वम्, संसारित्वं च। परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिसंबन्धपरिकल्पितस्वरूपव्यतिरेकेणास्ति। न हि नित्यमुक्तस्वरूपात्, सर्वज्ञात्, ईश्वरात् अन्यश्चेतनो धातुर्द्वितीयो वेदान्तनिरूपणायाम् उपलभ्यते 'नान्योऽतोऽस्ति द्रष्टा...श्रोता...मन्ता...विज्ञाता'... इत्यादिश्रुतिशतेभ्यः॥"

सू. भा. २-३-३०, पा. २८७, २८८

(३) "अपि च मिथ्याज्ञानपुरःसरोऽयम् आत्मनो बुद्ध्युपाधिसंबन्धः, न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्ति॥"

सू. भा. २-३-३०, पा. २८८

इति ॥ ७८ ॥

एवम्, स्वप्ने विहारदर्शनात्, विधिशास्त्रार्थवत्त्वात्, अहङ्कारपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्शनात्, बुद्धेः करणत्वेनैवोपक्षीणत्वात् स्वव्यतिरिक्तकर्त्रपेक्षणात्, श्रुतौ परमात्मज्ञानार्थं मनःसमाधानविधानदर्शनाच्च यद्यपि जीवः कर्तैवेत्युपपन्नम्; तथापि जीवस्य बुद्धिगुणसारत्वादेव सर्वमिदमवकल्पते। स्वाभाविकत्वे हि कर्तृत्वे न तस्मान्निर्मोक्ष एव सदा स्यात्, अग्नेरिवौष्ण्यात्। न तु तथास्ति। स्वप्नजागरितयोः कर्तृत्वदर्शनेऽपि सुषुप्तावस्थायां कार्यकरणसंबन्धाभावे सत्यकर्तृत्वानुभवात्। तस्मात्, अकर्तैव जीवः परमार्थत इत्यवसीयते। एतेन भोक्तृत्वमपि व्याख्यातं भवति। एवं हि भाष्यकार आह –

(१) "न हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते 'नान्योऽतोऽस्ति द्रष्टा' (बृ. ४-३-२३) इत्यादिश्रवणात्। पर एव तर्हि संसारी कर्ता च भोक्ता च प्रसज्येत। परस्मादन्यश्चेच्चिति-

मान् जीवः कर्ता बुद्ध्यादिसङ्घातव्यतिरिक्तो न स्यात् । न । अविद्या-प्रत्युपस्थापितत्वात् कर्तृत्वभोक्तृत्वयोः ॥ ”

सू. भा. २-३-४०, पा. २९२

(२) “ यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति, स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृतो निर्व्यापारः सुखी भवति, एवम् अविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति; स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसङ्घातोऽकर्ता सुखी भवति संप्रसादावस्थायाम् । तथा मुक्त्यवस्थायामपि अविद्याध्वान्तं विद्याप्रदीपेन विधूय आत्मैव केवलो निर्वृतः सुखी भवति । तक्षदृष्टान्तश्च एतावता अंशेन द्रष्टव्यः । तक्षा हि विशिष्टेषु तक्षणादिव्यापारेषु अपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्ता भवति, स्वशरीरेण तु अकर्तैव । एवम् अयमात्मा सर्वव्यापारेषु अपेक्ष्यैव मनआदीनि करणानि कर्ता भवति, स्वात्मना तु अकर्तैव – इति । न त्वात्मनस्तक्ष्ण इवावयवाः सन्ति, यैः हस्तादिभिरिव वास्यादीनि तक्षा – मनआदीनि करणान्यात्मा उपाददीत, न्यस्येद् वा ॥ ”

सू. भा. २-३-४०, पा. २९३

(३) “ समना एव स्वप्ने विहरति; विहारोऽपि च तत्रत्यो वासनामय एव, न तु पारमार्थिकोऽस्ति । तथा च श्रुतिरिवकारानुबद्धमेव स्वप्नव्यापारं वर्णयति । ‘ उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ’ (बृ.४-३-१३) इति । लौकिका अपि तथैव स्वप्नं कथयन्ति, ‘ आरुक्षमिव गिरिशृङ्गम्, अद्राक्षमिव वनराजिम् ’ इति ॥ ”

सू. भा. २-२-४०, पा. २९४

(४) “ अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्हति । अहङ्कारस्याप्युपलभ्यमानत्वात् । न चैवं सति करणान्तरकल्पनाप्रसङ्गः । बुद्धेः करणत्वाभ्युपगमात् । समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः । यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात् ॥ ”

सू. भा. २-३-४०, पा. २९५

(५) "कर्ता विज्ञानात्मा पुरुषः – इत्येवंजातीयकमपि शास्त्रम्, अनुवादरूपत्वात्, यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमनुसरिष्यति ॥

सू. भा. २-३-४०, पा. २९३, २९४

(६) "समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः; यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात् ॥" सू. भा. २-३-४०, पा. २९२

(७) "न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति; सर्वकारकाणामेव स्वस्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात्। उपलब्ध्यपेक्षं त्वेषां करणानां करणत्वम्, सा चात्मनः। न च तस्यामपि अस्य कर्तृत्वमस्ति; नित्योपलब्धिस्वरूपत्वात् ॥

सू. भा २-३-४०, पा. २९५

तदेवं बुद्ध्यध्यासकृतं व्यावहारिकं कर्तृत्वम्, अकर्तृत्वं तु स्वाभाविकमात्मनः – इति सिद्धम् ॥ ७९ ॥

एतेन जीवस्य परमात्मांशत्वमपि व्याख्यातम्; क्वचिज्जिज्ञासु-जिज्ञासितव्यत्वेन, क्वचित् नियन्तव्यनियामकत्वेनेत्यादिप्रकारेण भेद-निर्देशो दृश्यते, क्वचिच्चाभेदनिर्देशः–इत्युभयथा निर्देशात्, 'पादोऽस्य सर्वा भूतानि' (छां. ३-१२-६), 'ममैवांशो जीवलोके जीवभूतः' (गी. १५-७) इति च श्रुतिस्मृतिष्वंशत्वेन व्यपदेशदर्शनाच्च, जीवो ब्रह्मांश इति गम्यते। दुःखित्वसुखित्वाभ्यां विधिनिषेधगोचरत्व-तदगोचरत्वाभ्यां वैषम्यं तूपाधिसंबन्धतदसंबन्धाभ्यां शक्योपपादन इति व्यवहारदृष्ट्या जीवो ब्रह्मांश एवेत्यध्यवसातुं शक्यम्। परमार्थतस्तु निरवयवस्य ब्रह्मणः अंशासंभवात्, जीवोपाधेश्चाविद्याप्रत्युपस्थापित-त्वात्, जीवत्वस्य च ब्रह्मणि कल्पितत्वाच्च नांशांशित्वं मुख्यमवकल्पत इति। तथा हि भाष्यम् –

(१) अंश इवांशः । न हि निरवयवस्य मुख्योंऽशः संभवति ॥

सू. भा. २-३-४३, पा. २९७

इति । अभियुक्ताश्च वदन्ति –

नाकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवात्मनः सदा जीवो विकारावयवौ तथा ॥
यथा भवति बालानां गगनं मलिनं मलैः ।
तथा भवत्यबुद्धानामात्मापि मलिनो मलैः ॥

गौ. का. ३-७, ८, पा. २११, २१२

इति । भाष्यकारश्च –

"यथा प्रकाशः सौरश्चान्द्रमसो वा वियद् व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंबन्धात्तेष्वृजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भावमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते । यथा चाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति; यथा चोदशरावादिकम्पनात् तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान् सूर्यः कम्पते, एवम् अविद्याप्रत्युपस्थापिते बुद्ध्युपहिते जीवाख्येंऽशे दुःखायमानेऽपि न तद्वानीश्वरो दुःखायते । जीवस्यापि तु दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तम् ॥" सू. भा. २-३-४६, पा. २९९, ३००

इति ॥ ८० ॥

अथास्य जीवस्य उत्क्रान्तिगत्यागतिव्यवहारोऽपि मुख्यप्राणाद्युपाधिसचिवस्यैव, स्वतस्तूत्क्रान्त्यादयो न सन्तीति पूर्वमेवोपपादितम् (खं १०-४६, पा. ५४) । न तत्र पृथग्वक्तव्यमस्ति ॥ ८१ ॥

अथेदानीमवस्थावत्त्वमपि बुद्ध्युपाधिकृतमेवेत्यत्र किञ्चिदुच्यते । जागरितं तावत् कार्यकरणसङ्घाताभिमानवत एवेति सुप्रसिद्धम् । स्वप्नेऽपि बुद्ध्युपाधिसंबन्धादेव तस्य तत्रत्यविविधभावदर्शनं गतागतादि-

प्रत्ययश्च सर्वो वासनामय एवेति मायामयः, न तेनात्मनो वास्तवः संबन्धोऽस्तीति सुप्रतिपदम्। भाष्यमप्यत्र –

(१) "न तावत्सन्ध्ये स्थानेऽत्यन्तमात्मनः करणविरमणमस्ति; 'सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति' (बृ. मा. ४-१-७) इति तत्रापि धीसंबन्धदर्शनात्। तथा च स्मरन्ति 'इन्द्रियाणामुपरमे मनोनुपरतं यदि। सेवते विषयानेव तद्विद्यात् स्वप्नदर्शनम्' (मो. ध. २७५-२९) इति। कामादयश्च मनसो वृत्तय इति श्रुतिः। ताश्च स्वप्ने दृश्यन्ते। तस्मात् समना एव स्वप्ने विहरति॥"

सू. भा. २-३-४०, पा. २९४

(२) "मायैव सन्ध्ये सृष्टिर्न परमार्थगन्धोऽप्यस्ति। कुतः? कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्। न हि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः। किं पुनरत्र कार्त्स्न्यमभिप्रेतम्? देशकालनिमित्तसंपत्तिः, अबाधश्च॥" सू. भा. ३-२-३, पा. ३४४

एतच्च जागरितदृष्ट्या वीक्ष्यमाणस्य स्वप्नस्य मिथ्यात्वम् उपवर्णितम्। अवस्थाव्यतिरिक्तसाक्षिदृष्ट्या वीक्ष्यमाणे तु न स्वप्नजागरितयोरीषदपि वैषम्यमस्ति। यथोक्तमभियुक्तैः –

स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना॥

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः॥

सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः॥

अपूर्वं स्थानिधर्मो हि यथा स्वर्गनिवासिनाम्।
तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः॥

स्वप्नवृत्तावपि स्वन्तश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद् दृष्टं वैतथ्यमेतयोः ॥
जाग्रद्वृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद्युक्तं वैतथ्यमेतयोः ॥

गौ. का. २-पञ्चमश्लोकादारभ्य षट् श्लोकाः,
पा. १९७, १९८, १९९

इति । उभयोरप्यवस्थयोः सर्वसमत्वात्, अवस्थावत्त्वं जीवस्य जीवत्वमिवैव वितथमेवेति श्लोकानामभिप्रायः ॥ ८२ ॥

सुषुप्तावस्थायां पुनर्न कोऽप्युपाधिसंपर्कोऽस्ति जीवस्येति, तस्य जीवत्वमेवापगतं भवति तत्र । अत एव श्रुतिभिस्तत्र प्राज्ञेनात्मना एकीभाव एव उच्यते । तथा च 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च' (सू. भा. ३-२-७) इति सूत्रार्थव्याख्यानावसरे प्राह भाष्यकारः-

(१) "एवमेतासु श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि नाड्यः, पुरीतत्, ब्रह्म च इति । तत्रापि द्वारमात्रं नाड्यः पुरीतच्च, ब्रह्मैव त्वेकं सुषुप्तिस्थानम् । अपि च नाड्यः पुरीतद्वा जीवस्य उपाध्याधार एव भवति, तत्रास्य करणानि वर्तन्त इति । न ह्युपाधिसंबन्धमन्तरेण स्वत एव जीवस्याधारः कश्चित् संभवति । ब्रह्माव्यतिरेकेण स्वमहिमप्रतिष्ठितत्वात् । ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाधाराधेयभेदाभिप्रायेणोच्यते । कथं तर्हि तादात्म्याभिप्रायेण ? यत आह 'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति' (छां.) इति । स्वशब्देन आत्माऽभिलप्यते, स्वरूपमापन्नः सुप्तो भवतीत्यर्थः ॥"

सू. भा. ३-२-७, पा. ३५०, ३५१

(२) "अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति, स्वरूपस्यानपायित्वात् । स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पर-

रूपापत्तिमिवापेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते । अतश्च सुप्तावस्थायां कदाचित्सत्ता संपद्यते कदाचिन्न संपद्यते इत्ययुक्तम् ॥ "

सू. भा. ३-२-७, पा. ३५१

(३) " न च वयमिह तुल्यवन्नाड्यादिसमुच्चयं प्रतिपादयामः । न हि नाड्यः सुप्तिस्थानं पुरीतद् वा इत्यनेन विज्ञानेन किञ्चित् प्रयोजनमस्ति । न ह्येतद्विज्ञानप्रतिबद्धं किञ्चित्फलं श्रूयते । नाप्येतद्विज्ञानं फलवतः कस्यचिदङ्गमुपदिश्यते । ब्रह्म त्वनपायि सुप्तिस्थानम् इत्येतत् प्रतिपादयामः । तेन तु विज्ञानेन प्रयोजनमस्ति जीवस्य ब्रह्मात्मत्वावधारणं स्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च । तस्मात् आत्मैव सुप्तिस्थानम् ॥ " सू. भा. ३-२-८, पा. ३५१

इति ॥ ८३ ॥

परमसिद्धान्तरीत्या स्वप्नजागरिते एकीकृत्य दर्शनवृत्तिः स्वप्नः, अदर्शनवृत्तिश्च सुषुप्तिः – इति द्वे एवावस्थे भवतः । समाध्यादयस्तु अदर्शनवृत्तिसामान्यात् सुषुप्तिसमानयोगक्षेमाः । तथा च तेष्वपि जीवः स्वमेव रूपम् अपीतो भवतीत्युपपद्यते । यथाह भाष्यकारः –

(१) न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्यते ; मुग्धेऽपि तौ प्रत्ययौ नैव विद्येते । तस्मात् उपाध्युपशमात् सुषुप्तवन्मुग्धेऽपि कृत्स्नसंपत्तिरेव भवितुमर्हति, नार्धसंपत्तिरिति । अत्रोच्यते । न ब्रूमो मुग्धे अर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति, किं तर्हि अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वम्, अर्धेनावस्थान्तरपक्षस्येति ब्रूमः । दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये ॥ सू. भा. ३-२-१०, पा. ३५५

[ अत्रोक्ते साम्यवैषम्ये न मूर्छितदृष्ट्या, किं तु बाह्यपुरुषदृष्ट्या, मूर्छितदृष्ट्या तु ब्रह्मणा संपत्तिरेव भवतीति कण्ठरवेणोक्तत्वात् इति ध्येयम् ॥ ]

(२) " यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्याम् अविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति, एवम् इहापि भविष्यति ॥ " सू. भा. २-१-९, पा. १९१

[ अत्रापि सुषुप्तिसमाधिदृष्टया स्वाभाविक्येवाविभागप्राप्तिः । 'इहापि' इति प्रलये इत्यर्थः । तस्यैव प्रकृतत्वात् । अतः प्रलयोऽपि सुषुप्तिसमानयोगक्षेम एव ॥]

(३) " द्वैतं नानात्वं तस्य अद्वैतस्य भेदः, तद्भेदः, तस्य कार्यम् इत्यर्थः । 'एकमेवाद्वितीयम्, तत्तेजोऽसृजत' (छां.) इति श्रुतेः । उपपत्तेश्च । स्वचित्तस्पन्दनाभावे समाधौ, मूर्छायां सुषुप्तौ चाभावात् ॥" गौ. का. भा. ३-१८, पा. २१६

तदेवं सुषुप्तादौ जीवस्य नैवास्ति कश्चिद् द्वैतसंबन्धः ; अद्वितीय-ब्रह्मणैव तु एकीभावस्तदा इति श्रुतियुक्तिभ्यां सिद्धम् ॥ ८४ ॥

जागरिताद्यवस्थानां परिशीलनं प्रत्यवस्थम्, स्वरूपापेक्षया अवस्थान्तरापेक्षया चेति द्वेधा भवति । तद्यथा स्वप्नसुषुप्तापेक्षयैव जागरितस्य जागरितत्वम् ; स्वरूपेण तु स्वात्मन्यध्यस्तकार्यकरण-सङ्घातावस्थात्वम् । एवं स्वप्नस्य स्वप्नत्वं सुषुप्तापेक्षयैव, स्वरूपेण तु स्वात्मन्यध्यस्तवासनाप्रपञ्चावस्थात्वम् । एवं सुषुप्तेरपि स्वप्नापेक्षया अदर्शनवृत्तिनिद्रावस्थात्वम्, जागरितापेक्षया च विश्रान्तकरण-व्यापारावस्थात्वम् ; स्वरूपेण तु स्वप्नकामविरहितनिद्रावस्थात्वम्, ब्रह्मसंपत्त्यवस्थात्वं वा । अत एव श्रुतिः सुषुप्तिस्वरूपकथनायाऽऽह – 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्' (मां. ५) इति, 'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति' (छां. ६-८-१) इति च । एवं समाध्याद्यवस्था

अपि विज्ञेयाः । अत एव दर्शनवृत्तिस्वरूपमपेक्ष्य भाष्यकार आह – 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' (सू. ३-२-११) इति सूत्रार्थव्याख्यानमारभमाणः –

(१) "येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात् संपद्यते, तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते ॥"

सू. भा. ३-२-११, पा. ३५५

इति । एवं जागरितापेक्षया तु सुषुप्तिम्, स्थित्यपेक्षया च प्रलयावस्थाम् परिशीलयन्नाह –

(२) "यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवन्ति, नाविद्यमानान्युत्पद्यन्ते षण्डादीनामपि तदुत्पत्तिप्रसङ्गात्, एवम् अयमपि बुद्धिसंबन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति । एवं ह्येतद्युज्यते । न ह्याकस्मिकी कस्यचिदुत्पत्तिः संभवति । अतिप्रसङ्गात् ॥"

सू. भा. २-३-३१, पा. २८८, २८९

इति । न चैवं बुद्ध्याद्युपाधिसंबन्धोऽवशिष्यते वा न वा सुषुप्तादौ – इत्यत्र विनिगमनाविरहः; व्यवहारदृष्ट्या अस्तीत्यनुमीयते, परमार्थतस्तु नास्ति – इति स्वरूपपररूपापेक्षया व्यवस्थासंभवात् । तदप्याह भाष्यकृत् स्वयमेव –

(३) "अपि च मिथ्याज्ञानपुरःसरोऽयमात्मनो बुद्ध्युपाधिसंबन्धः । न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्ति – इत्यतो यावद्ब्रह्मात्मतानवबोधः, तावदयं बुद्ध्युपाधिसंबन्धो न शाम्यति ॥"

सू. भा. २-३-३०, पा. २८८

(४) " यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्याम् अविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत्पुनः प्रबोधे विभागो भवति, एवम् इहापि भविष्यति । श्रुतिश्चात्र भवति 'इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद् भवन्ति तदा भवन्ति ' इति ॥ "

सू. भा. २-१-९, पा. १९१

[ सुषुप्तौ प्रलये च स्वाभाविकी सत्संपत्तिः, प्रबोधे स्थितौ च पुनर्व्याघ्रादिभावो जीवानां मिथ्याज्ञाननिमित्तः – इत्युक्तमत्र ॥ ]

(५) " यथा हि अविभागेऽपि परमात्मनि मिथ्याज्ञानस्यानपोदितत्वात् मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते, एवम् अपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते ॥ " सू. भा. २-१-९, पा. १९१, १९२

[अत्र परमात्मा सदा द्वैतविभागरहित एव सन्, स्थितौ अध्यस्तविभागस्यास्पदभूतो यथा तथा प्रलयेऽपि अध्यस्तविभागशक्तिव्यवहारदृष्ट्यैव – इत्युक्तम् । अध्यासस्तु सुषुप्तौ प्रलये वा न कदापि संभवतीति तदा सत्संपत्तिः स्वाभाविक्येव इति च ॥ ]

(६) " 'तेजः परस्यां देवतायाम्' (छां. ६-८-६) इत्यत्र प्रकरणसामर्थ्यात् तद् यथाप्रकृतं तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत – इत्येतदुक्तं भवति । कीदृशी पुनरियं संपत्तिः स्यात् इति चिन्त्यते । तत्रात्यन्तिक एव तावत् स्वरूपप्रविलय इति प्राप्तम् । तत्प्रकृतित्वोपपत्तेः । सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवता – इति प्रतिष्ठापितम् । तस्मात्, आत्यन्तिकी इयम् अविभागापत्तिरिति । एवं प्राप्ते ब्रूमः । तत्तेजआदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतम्, आ अपीतेः संसारमोक्षात् सम्यग्ज्ञाननिमित्तात् अवतिष्ठते । 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।

स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्' (का.) इत्यादिसंसारव्यपदेशात्। अन्यथा हि सर्वः प्रायणसमय एवोपाधिप्रत्यस्तमयात् अत्यन्तं ब्रह्म संपद्येत। तत्र विधिशास्त्रम् अनर्थकं स्यात्, विद्याशास्त्रं च। मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानाद् ऋते विस्रंसितुमर्हति। तस्मात्, तत्प्रकृतित्वेऽपि सुषुप्तप्रलयवद् बीजभावावशेषैवैषा सत्संपत्तिरिति॥" सू. भा. ४-२-८, पा. ४८३

इति॥

अत्रापरविद्याऽपरसंज्ञासूपासनासु विद्वान् साक्षात्कृतेश्वरः प्रायणकाले परस्यां देवतायां संपद्यते इति वक्तुमारब्धमिदं प्रकरणम्, 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इति श्रुतिमाश्रित्य। अत एव हि समनन्तरपूर्वभाष्ये लिखितम् –

(७) "अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति। विद्वांस्तु ज्ञानप्रकाशितं मोक्षनाडीद्वारमाश्रयते॥" सू. भा. ४-२-७, पा. ४८३

इत्यादि। तस्मात् बीजभावावशेषत्वं सत्सम्पत्तेरिहोक्तं न परब्रह्मविदः। वक्ष्यते च गत्युत्क्रान्त्योरभावो ब्रह्मविदः 'प्रतिषेधादिति चेन्न शारीरात्' (सू. ४-२-१२) इत्यत आरभ्य। इदमेव च वैलक्षण्यमाश्रित्य बीजावशेषसत्संपत्तिनिर्बीजसत्संपत्त्योः तारतम्यं भाष्यकारेणोक्तम् अन्यत्र –

(८) "अविद्याप्रत्युपस्थापितद्वैतसंपृक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति। स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसङ्घातः, अकर्ता सुखी भवति संप्रसादावस्थायाम्। तथा मुक्त्यवस्थायामपि अविद्याध्वान्तं विद्याप्रदीपेन विधूय,' आत्मैव केवलो निर्वृतः सुखी भवति॥" सू. भा. २-३-४०, पा. २९३

इति॥ ८५॥

तदेवम्, सुषुप्ति-मूर्छा-समाधि-प्रलय-मरणाद्यवस्थासु सत्संपत्तिः स्वाभाविक्यपि सती, यावद्विद्योदयं मिथ्याज्ञाननिमित्तोपाधिसंपर्कं प्रहातुं न प्रभवतीति वेदान्तमर्यादा । अपि चासु सत्संपत्तिः श्रूयमाणा सावधानं प्रत्यभिज्ञाता स्फुटतरं ब्रह्मात्मैकत्वविज्ञानं लम्भयतीत्येतावता पुनःपुनरुपदिश्यते वेदान्तेषु, न पुनरदर्शनवृत्तिसुषुप्ताद्यवस्थास्वेव सत्संपत्तिर्भवतीति कृत्वा । यथाह भाष्यकृत् –

“ अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति, स्वरूपस्य अनपायित्वात् । स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते ॥ ”

सू. भा. ३-२-७, पा. ३५१

एवं समाध्यादिष्वपि व्युत्थानाद्यवस्थासु विभाव्यमानपररूपापत्तिमिवापेक्ष्य पररूपोपशमात् स्वरूपापत्तिरुच्यत इत्यतिदेष्टव्यम् ॥ ८६ ॥

## १७. वाक्यार्थज्ञानम्

एवं त्वंपदार्थविवेकप्रकारः प्रदर्शितः । निर्विशेषो नित्यशुद्धबुद्धमुक्तस्वरूपश्च सन्नप्ययमात्मा अनाद्यविद्याध्यारोपितदेहेन्द्रियमनआद्युपाधिसंपृक्त इव भात्यविवेकिनाम् ; ततश्च प्रमातृत्वं कर्तृत्वं भोक्तृत्वं चास्माकं स्वरूपमेवेति च । अन्वयव्यतिरेकेन तदपनयनार्थं त्वंपदार्थविवेकः कर्तव्यो भवति । उक्तं हि भाष्यकारेण –

(१) “ यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथापि, अध्यारोपितं बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् । तत्रैकेनाव-

धानेनैकमंशं व्यपोहति, अपरेणापरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः ॥ ”　　सू. भा. ४-१-२, पा. ४६२

इति । एतदेव श्रुतार्थस्य **मननं** नाम ॥ ८७ ॥

तत्र येषामेवं मननेनापि न त्वंपदार्थशुद्धिर्भवेत्, तेषां कृते **निदिध्यासनम**प्युपदिश्यते । यस्य श्रवणमात्रेण ब्रह्मात्मावगतिर्न जायते, तस्य मननापेक्षा, मननेनाप्यनवगतब्रह्मात्मभावस्य निदिध्यासनम् – इत्यधिकारिभेदेनेमानि विद्यासाधनान्युपदिश्यन्त इति बोध्यम् । तदुक्तं भाष्यकारेण –

(२) “ ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात्, न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम् । अत्रोच्यते– नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेदप्रमाणजनितब्रह्मात्मभाव-विरोधात् ॥ ”　　सू. भा. १-१-४, पा. २१

इति । श्रवणमात्रेणावगतब्रह्मात्मभाव एकः, तन्मात्रेणानवगतब्रह्मात्मभाव अपरः । तत्र द्वितीयस्यैव यथापूर्वं संसारित्वम् इत्यभिप्रायः ॥

(३) “ यत्पुनरुक्तं श्रवणात् पराचीनयोर्मनननिदिध्यासनयो-(र्विधि)दर्शनात् न ब्रह्मणः स्वरूपपर्यवसायित्वमिति । न । अवगत्यर्थत्वान्मनननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत्तदा विधिशेषत्वम् । न तु तदस्ति, मनननिदिध्यासनयोरपि श्रवणवद् अवगत्यर्थत्वात् ॥ ”　　सू. भा. १-१-४, पा. २३

इति ॥ ८८ ॥

एतच्च निदिध्यासनम्, न भावनासन्तानरूपमुपासनम्, किं तर्हि आत्मन्येव प्रणिधानेन मनःसंस्थापनप्रयत्नः, रत्नादिपरीक्षावत् ।

अत एव नात्राहंग्रहोपासनास्विव साक्षात्कारापेक्षा । भावनातिशयाद् हि तासूपासनासु साक्षात्कारः, तत एव चादृष्टं ध्येयसायुज्यं फलं तेषामित्यवोचाम **उपासनाखण्डे** (खं. १०-५०, पा. ५८)। पुनर्वस्तुतन्त्रज्ञानत्वाद् अवगतेः, इहैवापरोक्षस्वभावस्य ब्रह्मात्मनो दर्शनं निदिध्यासनफलम्। तच्च दर्शनम् आत्मानुभव एव न तु साक्षाद्दर्शनम्। 'दृश्यते त्वग्र्यया बुद्ध्या' (का. १-३-१२), 'आत्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इत्यादिश्रुतिभ्यः। 'ईक्षते योगयुक्तात्मा' (गी. ६-२९) इत्यादिस्मृतिभ्यश्च ॥

एतदेव च निदिध्यासनम् अध्यात्मयोगापरनाम्ना श्रावितम्। तत्प्रकारश्च एवं व्याख्यातो भाष्ये –

(१) "एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥
का. १-३-१२

इति वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥' (का.) इति । एतदुक्तं भवति । वाचं मनसि संयच्छेत्, वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत । मनोऽपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धौ अध्यवसायस्वभावायां धारयेत् । तामपि बुद्धिं महत्यात्मनि भोक्तरि, अग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत् । महान्तं त्वात्मानं शान्ते आत्मनि प्रकरणवति परस्मिन् पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेत्–इति च ॥" सू.भा.१-४-१, पा.१४७, १४८

इति ॥

ईश्वरगीतास्वपि इदमेव निदिध्यासनं ध्यानयोगापराभिधानम् इत्थं वर्णितम् –

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनःकृत्वा न किञ्चिदपि चिन्तयेत् ॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥
गी. ६–२४, २५, २६

इति । भगवन्तः श्रीगौडपादाचार्या अपि मनोनिग्रहापरनाम्ना एतदेव वर्णयांबभूवुः –

दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।
अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ॥
लये संबोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।
सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥
नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥
यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥
गौ. का. ३–४३, ४४, ४५, ४६

इति । अधिकं त्वत्र भाष्यतोऽधिगन्तव्यं गुरुमुखाच्चेति विरम्यते ॥ ८९ ॥

वस्तुतत्त्वावगतये अनुष्ठीयमानं निदिध्यासनं प्रणिधानात्मकत्वात् श्रवणमननयोरप्यनुगतमेव सत्, रूपविशेषप्राधान्यात् 'श्रवणम्', 'मननम्' इति च संज्ञान्तरं लभते । न हि प्रणिधानरूपविहीनं श्रवणं नाम

भवति, मननसंज्ञकं वा इति । अत एव ज्ञानस्याविधेयत्वात् श्रवणादीनां कर्तव्यत्वेनोपदेशः केवलं प्रत्यगात्माभिमुखीकरणार्थ इत्युक्तं भाष्यकृता –

(१) " यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्राऽऽत्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि । तस्यात्मान्वेषणाय प्रवृत्तस्य अहेयमनुपादेयं च आत्मतत्त्वम् उपदिश्यते– 'इदं सर्वं यदयमात्मा' (बृ. २-४-६), 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् .... तत् केन कं विजानीयात् । .... विज्ञातारमरे केन विजानीयात्' (बृ. ४-५-१५), 'अयमात्मा ब्रह्म' (बृ. २-५-१९) इत्यादिभिः ॥ "

सू. भा. १-१-४, पा. १९

इति ॥

अत्र दर्शनश्रवणमननविज्ञानानामविषयत्वात् ब्रह्मणोऽनुभव एव दर्शनमित्युक्तं भवति श्रुत्युदाहरणसामर्थ्यात् । श्रवणादीनां कर्तव्यत्वेनोपदेशस्य तु प्रत्यक्प्रवणतापादनमेव कृत्यम् इति च । अत एव सूत्रकार आह 'तदव्यक्तमाह हि' (सू. ३-२-२३), 'अपि च संराधने प्रत्यक्षानुमानाभ्याम्' (सू. ३-२-२४) इति । भाष्यकारश्च –

(१) " यत् प्रतिषिद्धात् प्रपञ्चजातादन्यत् परं ब्रह्म तदस्ति चेत् कस्मान्न गृह्यत इति ? उच्यते । 'तदव्यक्तमनिन्द्रियग्राह्यं सर्वदृश्यसाक्षित्वात् । आह ह्येवं श्रुतिः – 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा' (मुं. ३-१-८) ... इत्याद्या । स्मृतिरपि 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' (गी. २-२५) इत्यादि ॥ "

सू. भा. ३-२-२३, पा. ६६

(२) " अपि चैनमात्मानं निरस्तसमस्तप्रपञ्चम् अव्यक्तं संराधन-काले पश्यन्ति योगिनः। संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानम् ॥ "

सू. भा. ३-२-२४, पा. ३६७

इति ॥

न च निदिध्यासनेन दृष्टस्य परमात्मनो ध्यातुरन्यत्वं भवति । यत आह भाष्यकारः –

(३) " ननु संराध्यसंराधकभावाभ्युपगमात् परेतरात्मनोरन्यत्वं स्यादिति । नेत्युच्यते। यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदक-प्रभृतिषु कर्मसूपाधिभूतेषु सविशेषा इवावभासन्ते, न च स्वाभाविकीम् अविशेषात्मतां जहति, एवम् उपाधिनिमित्त एवायमात्मभेदः, स्वत-स्त्वैकात्म्यमेव । तथा हि वेदान्तेष्वसकृज्जीवप्राज्ञयोरभेदः प्रतिपाद्यते ॥"

सू. भा. ३-२-२५, पा. ३६७

इति ॥ ९० ॥

तदेवं श्रवणादिष्वेकेन द्वाभ्यां त्रिभिरेव वा विदितपदार्थ-स्याज्ञानादिप्रतिबन्धाभावात् तत्त्वमसिवाक्यं शक्नोति ब्रह्मात्मभावाव-गतिम् उत्पादयितुम् । सा चावगतिः सर्वत्र त्वंपदार्थे अध्यारोपितं जीवत्वं निवर्तयन्त्येव उदेति । यथोक्तं भाष्यकारैर्भूयो भूयः –

(१) " यावद् हि अविद्या न निवर्तते, तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते । तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते ॥ " सू. भा. १-४-६, पा. १५४

(२) अवस्थात्रयसाक्षी, एकोऽव्यभिचारी अवस्थात्रयेण व्यभि-चारिणा न संस्पृश्यते । मायामात्रं ह्येतत् परमात्मनोऽवस्थात्रयात्मना अवभासनम्, रज्ज्वा इव सर्पादिभावेनेति । अत्रोक्तं वेदान्तार्थसंप्रदाय-

विद्भिराचार्यैः 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्र-
मस्वप्नमद्वैतं बुद्धयते तदा ॥ " (गौ. का. १-१६) इति ॥ "
सू. भा. २-१-९, पा. १९१

(३) " अपि च यदा 'तत्त्वमसि' इत्येवंजातीयकेन अभेदनिर्देशेन अभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वम् । समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् ॥ " सू. भा. २-१-२२, पा. २०९

(४) " अतश्च स्वाभाविकत्वादभेदस्य, अविद्याकृतत्वाच्च भेदस्य विद्यया अविद्यां विधूय जीवः परेणानन्तेन प्राज्ञेनात्मना एकतां गच्छति ॥ " सू. भा. ३-२-२६, पा. ३६७

(५) " अपवादो नाम, यत्र कस्मिंश्चिद् वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति । यथा देहेन्द्रियसङ्घाते आत्मबुद्धिः, आत्मन्येवाऽऽत्मबुद्धया पश्चाद्भाविन्या 'तत्त्वमसि' इत्यनया यथार्थबुद्धया निवर्त्यते ॥ " सू. भा. ३-३-९, पा. ३८२

(६) " जीवस्यापि तु दुःखप्राप्तिरविद्यानिमित्तैव इत्युक्तम् । तथा च अविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयन्ति वेदान्ताः 'तत्त्वमसि' इत्येवमादयः ॥ "

सू. भा. २-३-४६, पा. ३००

(७) " आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः ; न स एव साक्षात्, नापि वस्त्वन्तरम् । .... आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्य उपदेशोपपत्तिः ॥ "

सू. भा. २-३-५०, पा. ३०२

इत्येवम् ॥ ९१ ॥

# १८. उपसंहारः

एतावानिह प्रकरणार्थः सङ्क्षेपतः –

(१) यद्यप्येकमेवाद्वितीयं ब्रह्म प्रत्यस्तमितसर्वप्रपञ्चं परमार्थतः 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छां. ७-२४-१) इत्यादिश्रुतिभ्यः, तथापि तदेवाविद्याकल्पितमाया-कार्योपाधितोऽनन्तजीवाश्रितं प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयं जगदिवाभाति व्यवहारावस्थायाम् ; 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छां. ६-२-३), 'अनेन जीवेनात्मनानुप्रविश्य नाम-रूपे व्याकरवाणि', 'अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्' (छां. ६-३-२, ३) इति च श्रुतेः। नामरूपमायोपाध्यपेक्षयैव च ब्रह्म 'जगत्कारणम्' 'सर्वज्ञम्' 'सर्वशक्ति' – इति च श्रुतिषु गीयते। 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः'(श्वे.६-९), 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते ॥' (मुं. १-१-९), 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६-८) इत्याद्यासु। ईशितव्य-जीवापेक्षयैव च 'ईश्वर' इति व्यपदिश्यते वेदान्तेषु 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ. ४-४-२२) इत्यादिश्रुतिभ्यः। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' (गी. १८-६१) इत्यादिस्मृतिभ्यश्च ॥ ९२ ॥

(२) सेयं माया, व्याकृतनामरूपलक्षणं जगत्, तदाश्रिता जीवाश्च ब्रह्मणि कल्पिताः, प्रतीयमानरूपेण तदाभासमात्रम्। न ब्रह्मैव,

नापि वस्त्वन्तरम् । न हि रज्जुसूर्याद्याभासाः सर्पजलसूर्यकादयः, स्वास्पदभूतरज्जुसूर्यादय एव साक्षात्, नापि ततोऽन्यत्वेनावधारयितुं शक्याः । परमार्थरूपेण तु ब्रह्मानन्यदेवेदं सर्वमपि जगत्, जीवाश्च । 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'तत्त्वमसि' (छां. ६-८-७) इत्यादिश्रुतिभ्यः ॥ ९३ ॥

(३) जीवस्य जन्ममरणादिभाक्त्वम्, प्रमातृत्वम्, कामाद्याश्रयत्वम्, कर्मकर्तृत्वम्, ईश्वरोपासकत्वम्, अणुत्वम्, उत्क्रान्तिगत्यागतिमत्त्वम्, स्वकृतक्रियाफलभोक्तृत्वम्, जागरिताद्यवस्थावत्त्वं च-इत्यादीनि सर्वाण्यप्युपाधितादात्म्याध्यासनिमित्तत्वात् आविद्यकान्येव । देहाद्युपाधिभ्यो विविच्य स्वेन रूपेण यावन्न विज्ञायते तावदेवायं संसारी, विज्ञातस्तु परमात्मैव भवति । 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥' (का. २-२-७), 'न जायते म्रियते वा' (का. १-२-१८), 'तं यथा यथोपासते तत्तदेव भवति' (श.ब्रा.१०-५-२-२०), 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' (बृ. १-४-१०), 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ. ४-४-२), 'योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति' (बृ. ४-४-६), 'तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मण इति नु कामयमानः ॥' (बृ. ४-४-६), 'अकृत्स्नो हि स प्राणन्नेव

प्राणो नाम भवति । वदन्वाक्पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव । स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीत' (बृ. १-४-७), 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (का. १-३-४), 'सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति' (बृ. मा. ४-१-७), 'तस्य त्रय आवसथास्त्रयः स्वप्नाः' (ऐ. ३-१२) – इत्यादिश्रुतिभ्य एतदेवमित्यवगम्यते ॥ ९४ ॥

(४) ब्रह्म तु जीवेभ्यो व्याकृतनामरूपलक्षणाज्जगतश्च सकाशात् सदा अन्यदेव । यथा हि रज्जुसर्पजलसूर्यकशुक्तिरजततलमालिन्यादयो न रज्जुसूर्यशुक्त्याकाशादिभ्योऽन्यत्वेन तत्त्वेन वा निर्वक्तुमशक्या एव प्रतिभासन्ते, नैवं रज्जुसूर्यादयः, स्वार्थत्वात् सर्पादिविकल्पनिरपेक्षमेव सिद्धत्वात्, एवं ब्रह्मापि, जगज्जीवत्वाभ्यां ब्रह्मत्वेन तदन्यत्वेन वा अशक्यनिर्वचनीयाभ्यां विलक्षणं स्वयंसिद्धम् । 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मा' (छां. ८-१४-१) इति श्रुतेः । नामरूपलक्षणं जगत्, अहंप्रत्ययविषयत्वलक्षणं जीवत्वं च सुषुप्ताद्यवस्थासु व्यभिचरत्स्वरूपत्वात् शक्यप्रत्याख्यानम् ; न तु ब्रह्म, अविनाशित्वात्, सर्वस्यापि–अप्रविहाय स्वप्रत्याख्यातारमपि – आत्मत्वाच्च । 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवति' (बृ. मा. ४-३-१५) इति, 'स एष नेतिनेत्यात्मा' (बृ. ३-९-२६) इति च श्रुतेः ॥ ९५ ॥

(५) अत एव नित्यनिरस्तजीवभावं निष्प्रपञ्चस्वभावमिदं ब्रह्म कल्पितोपाधिभेदप्रत्याख्यानेनैव स्वगतभेदापह्नवेनैव, कल्पितपररूप-

प्रतिषेधेनैव इहोपदेश्यं भवति। न स्वधर्मज्ञापनेन, नित्यनिर्धर्मकत्वात्। 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा' (बृ. २-५-१), 'नेह नानास्ति किञ्चन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (का. २-१-११), 'अस्थूलमनणु' (बृ. ३-८-८), 'अथात आदेशो नेति नेति' (बृ. २-३-६), 'नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ' (बृ. ३-८-११) इत्येवंजातीयकाभ्यः श्रुतिभ्यः ॥ ९६ ॥

(६) नित्यचैतन्यरूपोऽयं ब्रह्मात्मा। तेनैव च ज्योतिषा कार्यकरणसङ्घातलक्षणः पुरुषो ज्ञानकर्मलक्षणं सर्वं व्यवहारं कुरुते। तेनैव च परमार्थसत्येन मिथुनीभावं गतोऽहङ्कारः अहंप्रत्ययाश्रयो विषयश्च 'जीवात्मा' इति व्यवहाराङ्गं भवति। स हि जीवात्मा सर्वत्राहङ्कारपूर्वकमेव प्रवर्तते। 'अहं पश्यामि, अहं शृणोमि, अहं मन्ये' इत्येवं विषयज्ञाने 'अहं गच्छामि, अहमागच्छामि, अहं भुञ्जे, अहं पिबामि' इति चैवं प्रवृत्तिनिवृत्तिलक्षणक्रियायां च; तत्फलं च भुङ्क्ते इति ज्ञाता, कर्ता, भोक्ता च भवति। परमार्थसत्यभूतस्तु परमात्मा स्वरूपप्रकाशेन कूटस्थचैतन्यलक्षणेन सर्वमिदमवभासयन्नास्ते नित्यदा स्वेनैव रूपेण। किं च अहंप्रत्ययी सर्वं विषयजातं करणद्वारैव जानाति; ब्रह्मात्मा त्वन्यनिरपेक्षः साक्षादेव सर्वं पश्यतीति साक्षी इति व्यपदिश्यते। अपि चायं जीवः, तत्तत्कार्यकरणसङ्घाताभिमानी तत्तत्परिच्छिन्न एव ज्ञाता, कर्ता, भोक्ता च भवतीति प्रतिशरीरं

भिद्यते, न त्वेवं सर्वसाक्षिभूतं ब्रह्म । अत्र श्रुतयो भवन्ति – 'आत्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येति' (बृ. ४–३–६), 'श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः । चक्षुषश्चक्षुः' (के. २), 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति'(मुं. ३–१–१), 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वे. ६–११) इत्येवंजातीयकाः ॥ ९७ ॥

(७) तस्यैतस्य ब्रह्मणः, अतिसूक्ष्मत्वात्, अविषयत्वात्, प्रमातुरपि परमार्थात्मरूपत्वात्, नित्यस्वयंसिद्धावगतिरूपत्वाच्च, एतस्मिन्नविद्या-पुरःसरं प्रवर्तमानानि प्रमाणानि कानिचिदपि प्रवर्तितुं नोत्सहन्ते । आगमोऽपि तस्मिन् प्रमातृप्रमाणप्रमेयादिभेदमपनयति सर्वप्रत्यगात्म-त्वेनाविषयतया प्रतिपादयदिति **अन्त्यं प्रमाणम्** इत्युच्यते । 'तत्त्वमसि' इत्यादीनि च वेदान्तवाक्यानि त्वंपदार्थे स्वाभाविकाविद्यया विभाव्यमानान् सांसारिकधर्मान् व्युदस्यन्त्येव तं नित्यसिद्धे ब्रह्मरूपे प्रतिष्ठापयन्ति । अत्रानुसंधेयानीमानि श्रुतिवाक्यानि – 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ॥' (का. १–३–१०, ११), 'न तत्र चक्षु-र्गच्छति न वाग्गच्छति नो मनः । न विद्मो न विजानीमो यथैतदनु-शिष्यात् । (के. १-३), 'स त आत्माऽन्तर्याम्यमृतः'(बृ. ३-७-३....),

'सर्वभूतान्तरात्मा' (का. २-२-१२), 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८), 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-५-१), 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' (तै. २-९), 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् तत्केन कं जिघ्रेत् .... तत्केन कं विजानीयात्' (बृ. ४-५-१५), 'यस्यामतं तस्य मतम्' (के. २-३), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद' (बृ. ४-४-२५) - इत्याद्याः ॥ ९८ ॥

(८) किं बहुना ? यावदविद्यानिवृत्तिस्तावदेव सर्वो व्यवहारोऽनुवर्तते ; यदा त्वस्य सर्वं केवलं ब्रह्मात्मैवेति ज्ञानमुदेति तदा न कोऽपि व्यवहारोऽवशिष्यते । न चैवंविदः कार्यं किञ्चिदवशिष्यते । न तदा जगतो जन्मादिव्यवहारो वा जीवस्य बन्धमोक्षव्यवहारो वा पारमार्थिकोऽनुवर्तते । प्रपञ्चोपशमशिवस्वरूपत्वाद् ब्रह्मात्मनस्तदा तूष्णीं ब्रह्मानन्दानुभवेन स्थितिरेव तदुपदेश इति श्रुतयः -

'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत्तत्केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयात्' (बृ. ४-५-१५),

'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥' (बृ. ४-४-१२), 'अजायमानो बहुधा विजायते' (तै.आ. ३-१३-१), 'यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन् सन्देह्ये गहने प्रविष्टः। स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥' (बृ. ४-४-१३) इति। 'स होवाचाधीहि भो इति स तूष्णीं बभूव तं ह द्वितीये वा तृतीये वा वचन उवाच ब्रूमः खलु त्वं तु न विजानासि। उपशान्तोऽयमात्मा' (?) इत्याद्याः ॥

अभियुक्ताश्च –

'न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥' गौ.का. २-३२
'तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥' गौ.का. २-३८

इति ॥ ९९ ॥

(९) 'अविद्याप्रत्युपस्थापितोपाध्यविवेकतो बन्धः, तद्विवेकतश्च मोक्षः' इत्यपि परिभाषेयमध्यारोपापवादन्यायानुसारेण परमार्थे चित्तावतारोपायत्वेनैव कल्पिता संप्रदायविद्भिः। यस्मादयमप्यविद्याविद्याविभागोऽविद्यातद्दृष्ट्यनुसारेणैव देशितो विद्वद्भिः संव्यवहारार्थम्। यथा 'आकाशो नील' इत्याकाशतत्त्वविद्भिरपि व्यवह्रियते, एवम्। देशकालनिमित्तव्यवहारकारणमपि सती अविद्या आत्मनोऽस्तीति नैव श्लिष्यते; जिज्ञासानन्तरं जाता आगन्तुकी विद्या तां निवर्तयतीत्यपि न युक्तिसहम्। यथोक्तं वार्तिककारैः –

**देशकालाद्यसंबन्धाद्देशादेर्मोहकार्यतः ।**
**नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्यतः ॥**
**तत्त्वमस्यादिवाक्योत्थसमग्धीजन्ममात्रतः ।**
**अविद्या सह कार्येण नासीदस्ति भविष्यति ॥ सं. वा. १८३**

इति ॥ १०० ॥

सेयं विशुद्धवेदान्तसंप्रदायविदां मता ।
परिभाषा संगृहीता मन्दानां हितकाम्यया ।
उन्मृज्य सकलान् दोषान् गुणान् गृह्णन्तु साधवः ।
भक्त्यार्पितमिदं ग्रन्थं प्रीत्या गृह्णातु शङ्करः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवत्पादचरणस्मरण-
परिचयावाप्तवेदान्तप्रवेशेन श्रीब्रोधानन्देन्द्रसरस्वतीशिष्य-
सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीता
**विशुद्धवेदान्तपरिभाषा**

ओं तत्सत्

# शब्दानुक्रमणिका

**अवधेयम् :-** अत्र यद्यपि ग्रन्थप्रास्ताविकविज्ञप्त्यवलोकनेन, उपसंहारखण्डार्थसमालोचनेन च गृह्णीयुरेव सुधियः प्रकरणसारम्, तथापि तत्र तत्र प्रतिपादितविषयविशेषेषु कथं नाम चित्तं धारयेयुर्जिज्ञासव इतीयं प्रधानशब्दानां वर्णानुक्रमणिकापि संयोजिता अस्ति; पत्रपार्श्वसङ्ख्यास्तु कतिपया एव प्रदर्शनार्थं दत्ता इति ॥


**अक्षरम्**, ४, ८.
**अजाद्वयात्मतत्त्वम्**, १९.
**अध्यस्तम्**, ५.
**अध्यस्तस्य उत्पत्तिविनाशौ**, ५.
**अध्यात्मयोगः**, ११६.
**अध्यस्तेन संबन्धः**, ४.
**अध्यारोपापवादन्यायः**, ३८, १२७.
**अध्यासः, अध्यारोपः**, ४.
**अनात्मा**, ३.
**अनुभवः**, ११, ३९, ४०, ७५.
**अनुभवात्मकः**, ९८.
**अनृतम्**, ३.
**अन्तःकरणम् (मनः)**, ३७, ५४.
**अन्तरङ्गसाधनानि (विद्यायाः)**, ७३.
**अन्त्यं प्रमाणम्**, ३८, १२५.
**अन्वयव्यतिरेकतर्कः**, ४१, ७९.
**अवाङ्मनसगोचरम्**, २.
**अध्यारोपितातद्धर्मनिवर्तकम्**, २.
**अवगतिः**, ८०, ११७, ११९.
**अवस्थाः**, १०७.
**अविद्या**, ४.
**अविद्याकल्पितनामरूपे, माया**, ८, १२१.
**अविद्यासिद्धिः**, ३५.
**अविद्यास्वरूपकार्याणि**, ४.
**अवस्थाः**, १०६-१११.
**अशरीरत्वम्**, १००.
**अस्मत्प्रत्ययगोचरम्, अहंप्रत्ययगोचरः**, ३, ६.
**अहंप्रत्ययी (विषयी)**, १२४.
**अहङ्कर्ता**, ३, ६.
**अहङ्कारः**, २४, ५९, १०३.
**आत्मानात्मानौ**, ३, ४, १०१.
**आभासः**, ३३.
**आस्पदम्**, ३६, १२२.
**इतरेतराध्यासः**, २-४.
**इन्द्रियाणि**, २६, ५४.
**ईश्वरः**, ६.
**उपाधयः (जीवस्य)**, ५४, १०१.

उपासनम्, ४५, ४६, ४८, ५०, ५७.
उपास्यं ब्रह्म, ८६.
कर्तृत्वभोक्तृत्वे, १३, ४२, १०३.
कारणम्, कार्यं च, १०, १२.
कार्यब्रह्म, ८६.
कालाकाशादीनामपि कारणम्, १२.
कूटस्थचैतन्यम्, १२४.
गत्यागती (जीवस्य), २९, १०६.
घटाकाशमहाकाशव्यवहारः, २९.
चोदनातन्त्रम् (ध्यानम्), ४५.
जगत्, ११, १२.
जगतो ब्रह्मव्यतिरेकेणाभावः, १०.
जागरिताद्यवस्थापरिशीलनम्, ११०.
जीवस्य जीवत्वम्, ३३, ३४, ३८.
,, जन्मादि, २९, ९९–१०१.
,, प्रमातृत्वम्, ३१, ३४, १०१, १२३.
,, कर्तृत्वभोक्तृत्वे, ४३, १०३.
,, अणुत्वम्, १०२.
,, गत्यागती, ५३, १०६.
,, ब्रह्मांशत्वम्, १०५.
,, अवस्थावत्त्वम्, १०६–११४.
,, ब्रह्मात्मत्वम्, ५२, ६८, ६९.
ज्ञानम्, ३९, १०२.
ज्ञेयं ब्रह्म, ८७.
तत्पदार्थनिर्णयः, ७८, ८७–९९.
तर्कः, ४०–४१.
तादात्म्याध्यासः, ताद्धर्म्याध्यासश्च, ३.
तत्त्वान्यत्वाभ्यामनिर्वचनीयम्, ११, ३४.
त्वंपदार्थविवेकः, ७९, ९९, ११४.
देहेन्द्रियादयः, ३, ५, ८१.
द्विरूपं ब्रह्म, ८४.
ध्यानम्, ४८.
ध्याननियोगः, ५९, ७१.
नामरूपबीजम्, ६, ८, १२३.
नामरूपव्याकरणम्, ६.
नित्यशुद्धबुद्धम्, ३१.
निदिध्यासनम्, ११५–११७.
नियोगवादः, ५९, ६०, ७१.
निरस्तसर्वविशेषं ब्रह्म, ९६, ९९.
निर्विशेषम्, ९६, ९७.
निष्प्रपञ्चं ब्रह्म, ६२.
पदार्थत्वम्, ८२.
परमार्थः, परमार्थतत्त्वम्, १८, १९.
परमेश्वरः, ८.
परिणामश्रुतयः, ११.
प्रत्यक्षादिव्यवहारः, ३१.
प्रत्यस्तमितसर्वविशेषम्, प्रत्यस्तमितसर्वप्रपञ्चम्, २, १२१.
प्रणिधानम्, ११५, ११९.
प्रपञ्चप्रविलयः, ६५, ६६.
प्रवृत्तिनिवृत्तिरूपो व्यवहारः, ४२, ४३.
प्रसङ्ख्यानवादः, ७०.
बुद्ध्युपाधिः, १०२.
ब्रह्म, १–३.

ब्रह्मणः जगदुपादानत्वम्, ११, १२, १५.
,, जगत्कर्तृत्वम्, १४, २०, २१, २२.
,, परिणामः, १६.
,, सर्वज्ञत्वम्, सर्वशक्तित्वं च, ६-९.
,, शब्दप्रमाणकत्वम्, ३७-३९.
ब्रह्मात्मैकत्वम्, ९, १०, ११, २२, २४.
भावना, ११५.
माया, ६.
मायापरिणामित्वम्, २४.
मायासत्कार्यवादः, १६, १७.
मिथ्याज्ञानम्, मिथ्याबुद्धिः, मिथ्याप्रत्ययः, मिथ्याविकल्पः, ४, ६, १००.
रूपभेदः (ब्रह्मणः), ११.
वस्तुतन्त्रम्, ४५.
वाक्यार्थत्वम्, ८२, ९४.
वाक्यार्थज्ञानम्, ११४, ११९.
विषयविषयिणौ, ३.
व्यवहारः, ४, ४२, ४३, १०१.
व्याकृताव्याकृतात्मकः, ११.
शक्तिः, १६.
श्रवणादीनि, ७५.
सत्संपत्तिः, ११४.
सशरीरत्वम्, १००.
साक्षात्कारः, ८१, ११६.
सुषुप्त्याद्यवस्थाः, ११४.
सृष्टिः, १८, १९, २१.
सृष्टिप्रलययोः क्रमः, २५-२८.

The Adhyatma Prakasha Press,
Holenarsipur.

## शुद्धशाङ्करप्रस्थानप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

१. **ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** – सटिप्पणभाष्यसहिताः ।

२. **तैत्तिरीय आनन्दवल्ली भृगुवल्ली च – सभाष्या** – श्रीसच्चिदानन्देन्द्रसरस्वतीकृतभाष्यार्थविमर्शिनीसहिता ।

३. **माण्डूक्यरहस्यविवृतिः** – श्रीसच्चिदानन्देन्द्रसरस्वतीकृता विस्तृतव्याख्या ।

४. **सुगमा** – अध्यासभाष्यस्य नवीनव्याख्या, श्रीसच्चिदानन्देन्द्रसरस्वतीकृता ।

५. **सूत्रभाष्यार्थतत्त्वविवेचनी** – जिज्ञासाधिकरणभाष्यव्याख्या ,,

६. ,, जन्माद्यधिकरणभाष्यव्याख्या ,,

७. **वेदान्तप्रक्रियाप्रत्यभिज्ञा** – शङ्करभगवत्पादसंमतां वेदान्तासाधारणप्रक्रियां विशदयन्ती, अत्यन्तप्राचीनकालादारभ्य सर्वज्ञात्ममुनिपर्यन्तम् वेदान्तविचारेतिहासधाराप्रदर्शिनी च । श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीता ।

८. **पञ्चपादिकाप्रस्थानम्** – शाङ्करप्रस्थानात् पञ्चपादिकाप्रस्थानस्य वैलक्षण्यं स्फुटयन् विमर्शात्मको ग्रन्थः । श्रीसच्चिदानन्देन्द्रसरस्वतीकृतिः ।

९. **क्लेशापहारिणी** – श्रीसुरेश्वराचार्यप्रणीत नैष्कर्म्यसिद्धेर्नवीनव्याख्यानरूपा । वार्तिकप्रस्थानस्वरूपं सुविविक्तं बुभुत्सूनां कृते नूत्नतया प्रकाशितोऽयं स्वतन्त्रनिबन्धः । श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीतेयं व्याख्या जिज्ञासुभिरवश्यमवलोकनीया ।

सविवरणग्रन्थसंस्तवार्थं मूल्यादिविशेषविज्ञानार्थं च

अभ्यर्थनीयस्थानम्

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.**

( हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे )

# THE

# ADHYATMA PRAKASHA KARYALAYA,

( ESTABLISHED 1920 )

HOLENARSIPUR. ( Hassan District, Mysore State, India )

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyatma Vidya—Philosophy and Religion in its universal aspect—especially as revealed in the Upanishads and allied literature.

1. Has so far published more than ONE HUNDRED AND FORTY BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent DISCUSSIONS, DISCOURSES, and PUBLIC LECTURES; VEDANTA CLASSES in the morning form a regular feature.

3. Has a free-lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Jñāna, Bhakti and Vairāgya.

5. Maintains a VEDANTIC COLLEGE for training up model students for the dissemination of Vedantic ideas.

6. Has a TEMPLE dedicated to the service of Sri Digvijaya Rāma.

Please apply to the Manager
for fuller information